इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
पिबा सुतस्य मतिर् न मधोश् चकानश् चारुर् मदाय ॥ ९ ॥

इन्द्र जठरं नव्यं न पृणस्व मधोर् दिवो न ।
अस्य सुतस्य स्वर् णोप त्वा मदाः सुवाचो अस्थुः ॥ १० ॥

इन्द्रस् तुराषाण् मित्रो न जघान वृत्रं यतिर् न ।
बिभेद वलं भृगुर् न ससाहे शत्रून् मदे सोमस्य ॥ ११ ॥

॥ ६ ॥

३.७

ऋ ८.९२.१
पान्तम् आ वो अन्धस इन्द्रम् अभि प्र गायत ।
विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥

२
पुरुहूतं पुरुष्टुतं गाथान्या सनश्रुतम् ।
इन्द्र इति ब्रवीतन ॥ २ ॥

३ * * * महानां...
महाँ अभिज्ञ्व् आ (एवं कौ) *
७.३१.१
इन्द्र इन् नो महानां दाता वाजानां नृतुः ।
महां अभिज्रया यमत् ॥ ३ ॥

प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
सखायः सोमपाव्ने ॥ ४ ॥

२
शंसेद् उक्थं सुदानव उत द्युक्षं यथा नरः ।
चकृमा सत्यराधसे ॥ ५ ॥

३
त्वं न इन्द्र वाजयुस् त्वं गव्युः शतक्रतो ।
त्वं हिरण्ययुर् वसो ॥ ६ ॥

८.२.१६
वयम् उ त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
कण्वा उक्थेभिर् जरन्ते ॥ ७ ॥

१७
...स्तोमं *
न घेम् अन्यद् आ पपन वज्रिन्न् अपसो नविष्टौ ।
तवेद् उ स्तोमैश् चिकेत ॥ ८ ॥

१८
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
यन्ति प्रमादम् अतन्द्राः ॥ ९ ॥

८.९२.१९
इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
अर्कम् अर्चन्तु कारवः ॥ १० ॥

२० यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
इन्द्रं सुते हवामहे ॥ ११ ॥
२१ त्रिकद्रुकेषु चेतनं देवासो यज्ञम् अक्षत ।
तम् इद् वर्धन्तु नो गिरः ॥ १२ ॥ ॥७॥

३.८

* ८.१७.११ अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
...पिब (एवं को) एहीम् अस्य द्रवा पिबा ॥ १ ॥
१२ शाचिगो शाचिपूजनायं रणाय ते सुतः ।
आखण्डल प्र हूयसे ॥ २ ॥
१३ * * * नपात्... यस् ते शृङ्गवृषो णपात् प्रणपात् कुण्डपाय्यः ।
न्य् अस्मिन् दध्र आ मनः ॥ ३ ॥
८.८१.१ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन ॥ ४ ॥
२ विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
तुविमात्रम् अवोभिः ॥ ५ ॥
३ नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
भीमं न गां वारयन्ते ॥ ६ ॥
८.४५.२२ अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
तृम्पा व्य् अश्नुही मदम् ॥ ७ ॥
२३ मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।
* ब्रह्मद्विषो * मार्की ब्रह्मद्विषं वनः ॥ ८ ॥
२४ * * गोपरीणसा... इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।
सरो गौरो यथा पिब ॥ ९ ॥
८.२.१ इदं वसो सुतम् अन्धः पिबा सुपूर्णम् उदरम् ।
अनाभयिन् ररिमा ते ॥ १० ॥
२ * धूतः * * अव्यो... नृभिर् धौतः सुतो अश्वैर् अव्या वारैः परिपूतः ।
अश्वो न निक्तो नदीषु ॥ ११ ॥
३ तं ते यवं यथा गोभिः स्वादुम् अकर्म श्रीणन्तः ।
इन्द्र त्वास्मिन् सधमादे ॥ १२ ॥ ॥८॥

३.९

* ३.५१.१० इदं ह्य् अन्व् ओजसा सुतं राधानां पते ।
पिबा त्व् अस्य गिर्वणः ॥ १ ॥
१२ प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
...राधसे प्र बाहू शूर राधसा ॥ २ ॥
११ यस् ते अनु स्वधाम् असत् सुते नि यच्छ तन्वम् ।

...सोम्यम्
१.५.१
२
३ ...पुरन्ध्याम्
१.३०.७
८
९
८.१३.१ इन्द्रः...पुनीत *
* * दक्षसो...
२
३ * अह्व...

स त्वा ममत्तु सोम्य ॥ ३ ॥
आ त्व् एता नि षीदतेन्द्रम् अभि प्र गायत ।
सखायः स्तोमवाहसः ॥ ४ ॥
पुरूतमं पुरूणाम् ईशानं वार्याणाम् ।
इन्द्रं सोमे सचा सुते ॥ ५ ॥
स घा नो योग आ भुवत् स राये स पुरन्ध्या ।
गमद् वाजेभिर् आ स नः ॥ ६ ॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रम् ऊतये ॥ ७ ॥
आ घा गमद् यदि श्रवत् सहस्रिणीभिर् ऊतिभिः ।
वाजेभिर् उप नो हवम् ॥ ८ ॥
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
यं ते पूर्वे पिता हुवे ॥ ९ ॥
इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
विदे वृधस्य दक्षस्य महान् हि षः ॥ १० ॥
स प्रथमे व्योमनि देवानां सदने वृधः ।
सुपारः सुश्रवस्तमः सम् अप्सुजित् ॥ ११ ॥
तम् उ हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।
भवा नः सुश्रे अन्तमः सखा वृधे ॥ १२ ॥ ॥९॥

३.१०

ऋ ७.१६.१
२
[कौ) * *
७.८१.१ प्रत्यु अदर्श्यायत्युछन्ती (एवं अपो महि व्ययति चक्षसे * * *
२
७.७४.१
* * अह्व ऽवसे (एवं कौ) * * * *
२

एना वो अग्निं नमसोर्जो नपातम् आ हुवे ।
प्रियं चेतिष्ठम् अरतिं स्वध्वरं विश्वस्य दूतम् अमृतम् ॥ १ ॥
स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥ २ ॥
प्रति वो दृश्यायत्य् उच्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष् कृणोति सूनरी ॥ ३ ॥
उद् उस्रियाः सृजते सूर्यः सचा उद्यन् नक्षत्रम् अर्चिवत् ।
तवेद् उषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ ४ ॥
इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वाम् अह्वयवसे शचीवसू विशंविशं हि गच्छथः ॥५॥
युवं चित्रं ददथुर् भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग् रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥ ६ ॥
॥१०॥

३.११

ऋ ९.५४.१

अस्य प्रत्नाम् अनु द्युतं शुक्रं दुदुह्रे अह्रयः ।

पयः सहस्रसाम् ऋषिम् ॥ १ ॥
२ अयं सूर्य इवोपदग् अयं सरांसि धावति ।
सप्त प्रवत आ दिवम् ॥ २ ॥
३ अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
सोमो देवो न सूर्यः ॥ ३ ॥
९.३.९ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
हरिः पवित्रे अर्षति ॥४॥
९.४२.२[१.२] एष प्रत्नेन मन्मना देवो देवेभ्यस् परि ।
८.४४.१२[३] कविर् विप्रेण वावृधे ॥ ५ ॥
९.४२.४ * प्रत्नमित् (एवं कौ)... दुहानः प्रत्नवित् पयः पवित्रे परि षिच्यसे ।
* * अजीजनत् क्रन्दन् देवं अजीजनः ॥ ६ ॥
९.१९.६ ... शत्रुषु उप शिक्षापतस्थुषो भियसम् आ धेहि शत्रवे ।
पवमान विदा रयिम् ॥ ७ ॥
९.६१.१३ उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषुः ॥ ८ ॥
९.११.१ उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवं इयक्षते ॥ ९ ॥ ॥११॥

३.१२

* ९.३३.१ * * * ऽपां न यन्त्य् * प्र सोमासो विपश्चितो अपो नयन्त ऊर्मयः ।
वनानि महिषा इव ॥ १ ॥
२ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
वाजं गोमन्तम् अक्षरन् ॥ २ ॥
३ सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
* अर्षन्ति * सोमा अर्षन्तु विष्णवे ॥ ३ ॥
९.१०७.१२ प्र सोम देववीतये सिन्धुर् न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविर् अच्छा कोशं मधुश्चुतम् ॥ ४ ॥
१३ * * अर्जुने... आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर् न मर्ज्यः ।
तम् ईं हिन्वन्त्य् अपसो यथा रथं नदीष्व् आ गभस्त्योः ॥ ५ ॥
९.३२.१ ... मघोनः प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
सुता विदथे अक्रमुः ॥ ६ ॥
९.१०६.१३ पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।
अभ्यर्षन् स्तोतृभ्यो वीरवद् यशः ॥ ७ ॥
९.१०१.१३ * सुन्वानस्यान्धसो * * वृत * * प्र सुन्वानायान्धसो मर्तो न वष्ट तद् वचः ।
अप श्वानम् अराधसं हता मखं न भृगवः ॥ ८ ॥ ॥१२॥

३.१३

ऋ ९.६२.२५ पवस्व वाचो अग्रियः सोम चित्राभिर् ऊतिभिः ।
अभि विश्वानि काव्या ॥ १ ॥

२६ त्वं समुद्रिया अपो ऽग्रियो वाच ईरयन् ।
* विश्वमेजय पवस्व विश्वचर्षणे ॥ २ ॥

२७ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
* अर्षन्ति सिन्धवः तुभ्यं धावन्ति धेनवः ॥ ३ ॥

९.६१.२८ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
विश्वा अप द्विषो जहि ॥ ४ ॥

२९ अस्य... (द्वितीयतृतीयपादयोर् विपर्यासः) यस्य ते सख्ये वयं सासह्याम पृतन्यतः ।
तवेन्दो द्युम्न उत्तमे ॥ ५ ॥

३० या ते भीमान्य् आयुधा तिग्मानि सन्ति धूर्वणे ।
रक्षा समस्य नो निदः ॥ ६ ॥

९.६४.१ वृषा सोम द्युमं असि वृषा देव बृषव्रतः ।
* * दधिषे वृषा धर्माणि दध्रिषे ॥ ७ ॥

२...मदः वृष्णस् ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ।
सत्यं * * * स त्वं वृषन् वृषेद् असि ॥ ८ ॥

३ * * चक्रदो (एवं कौ)... अश्वो न चक्रदद् वृषा सं गा इन्दो सम् अर्वतः ।
वि नो राये दुरो वृधि ॥ ९ ॥

९.६५.४[१.२] वृषा ह्य् असि भानुना द्युमन्तं त्वा हवामहे ।
११[२] पवमान स्वर्दृशम् ॥ १० ॥

६ * * * मृज्यमानो गभस्त्योः यद् अद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः ।
द्रुणा... द्रोणे सधस्थम् अश्नुषे ॥ ११ ॥

५ आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।
इहो ष्व् इन्दव् आ गहि ॥ १२ ॥

९.६१.४ पवमानस्य ते वयं पवित्रम् अभ्युन्दतः ।
सखित्वम् आ वृणीमहे ॥ १३ ॥

५ ये ते पवित्रम् ऊर्मयो ऽभिक्षरन्ति धारया ।
...मृळय (कौ मृडय) तेभिर् नः सोम मृडया ॥ १४ ॥

६ स नः पुनान आ भर रयिं वीरवतीम् इषम् ।
ईशानः सोम विश्वतः ॥ १५ ॥ ॥१३॥

३.१४

ऋ १.१२.१ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥

२ अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।

हव्यवाहं पुरुप्रियम् ॥ २ ॥
अग्ने देवं इहावह जज्ञानो वृक्तबर्हिषे ।
असि होता न ईड्यः ॥ ३ ॥
१.२१.४ [आता • मित्रं वयं हवामहे वरुणं सोमपीतये ।
आजाना (वा नासत्या) पूतदक्षसा । वी • या जजाना पूतदक्षसा ॥ ४ ॥
५ ऋतेन याव् ऋतावृधाव् ऋतस्य ज्योतिषस् पती ।
ता मित्रावरुणा हुवे ॥ ५ ॥
६ वरुणः प्राविता भुवन् मित्रो विश्वाभिर् ऊतिभिः ।
करतां नः सुराधसः ॥ ६ ॥
१.७.१ इन्द्रम् इद् गाथिनो बृहद् इन्द्रम् अर्केभिर् अर्किणः ।
इन्द्रं वाणीर् अनूषत ॥ ७ ॥
२ इन्द्र इद् धर्योः सचा संमिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥ ८ ॥
४ • • नो अव (पवं वी)... इन्द्र वाजेषु णो अव सहस्रप्रधनेषु च ।
उग्र उग्राभिर् ऊतिभिः ॥ ९ ॥
७.९४.४ इन्द्रे अग्ना नमो बृहत् सुवृक्तिम् एरयामहे ।
धिया धेना अवस्यवः ॥ १० ॥
५ ता हि शश्वन्त ईडत इत्था विप्रास ऊतये ।
सधाधो वाजसातये ॥ ११ ॥
६ • • • विपन्यवः... ता वां गीर्भिर् विपन्युवः प्रयस्वन्तो हवामहे ।
मेधसाता सनिष्यवः ॥ १२ ॥ ॥ १४ ॥

३.१५

* ९.६५.१० वृषा पवस्व धारया मरुत्वते च मत्सरः ।
विश्वा दधान ओजसा ॥ १ ॥
११ तं त्वा धर्तारम् ओण्योः पवमान स्वर्दृशम् ।
हिन्वे वाजेषु वाजिनम् ॥ २ ॥
१२ अया चित्तो विपानया हरिः पवस्व धारया ।
• • चोदय (पवं वी) युजं वाजेषु चोदया ॥ ३ ॥
९.९७.१२ वृषा शोणो अभिकनिक्रद् गा नदयन् एषि पृथिवीम् उत द्याम् ।
...प्रचेतयन्नर्षसि इन्द्रस्येव वग्नुर् आ शृण्व आजौ प्रचोदयन् अर्षसि वाचम् एमाम् ॥ ४ ॥
१४ रसाय्यः पयसा पिन्वमान ईरयन् एषि मधुमन्तम् अंशुम् ।
पवमान संतनिम् एषि कृण्वन् इन्द्राय सोम परिषिच्यमानः ॥ ५ ॥
पवमानः...

१५ ... वधस्नैः
एवा पवस्व मदिरो मदायोद्ग्राभस्य नमयन् वधस्नुम् ।
परि वर्णं भरमाणो रुशन्तं गव्युर् नो अर्ष परि सोम सिक्तः ॥ ६ ॥

६.४६.१ ...साता * *
त्वाम् इद् धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्व् इन्द्र सत्पतिं नरस् त्वां काष्ठास्व् अर्वतः ॥ ७ ॥

२
स त्वं नश् चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गाम् अश्वं रथ्यम् इन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ८ ॥

८.४९.१
अभि प्र वः सुराधसम् इन्द्रम् अर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ९ ॥

२
शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेर् इव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ १० ॥

८.९९.१
त्वाम् इदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
* * स्तोमवाहसाम्...
स इन्द्र स्तोमवाहस इह श्रुध्य् उप स्वसरम् आ गहि ॥ ११ ॥

२ * सुशिप्र * तद् ...
मत्स्वा सुशिप्रिन् हरिवस् तम् ईमहे त्वय् आ भूषन्ति वेधसः ।

* * * उक्थ्या...
तव श्रवांस्य् उपमान्य् उक्थ्य सुतेष्व् इन्द्र गिर्वणः ॥ १२ ॥ ॥१५॥

३.१६

ऋ ९.६१.१९
यस् ते मदो वरेण्यस् तेना पवस्वान्धसा
देवावीर् अघशंसहा ॥ १ ॥

२०
जघ्निर् वृत्रम् अमित्रियं सस्निर् वाजं दिवेदिवे ।
गोषातिर् अश्वसा असि ॥ २ ॥

गोषा उ * *
२१ * * भव...
संमिश्लो अरुषो भुवः सूपस्थाभिर् न धेनुभिः ।
सीदन् श्येनो न योनिम् आ ॥ ३ ॥

९.१०८.१
पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥ ४ ॥

९.१०६.१
इन्द्रम् अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी...
श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ५ ॥

९.१०१.७
अयं पूषा रयिर् भगः सोमः पुनानो अर्षति ।
पतिर् विश्वस्य भूमनो व्य् अख्यद् रोदसी उभे ॥ ६ ॥

८
सम् उ प्रिया अनूषत गावो मदाय घृष्वयः ।
सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ७ ॥

९
य ओजिष्ठस् तम् आ भर पवमान श्रवाय्यम् ।
...वनामहै
यः पञ्च चर्षणीर् अभि रयिं येन वनामहे ॥ ८ ॥

९.८६.१९ ...अह्नः *
वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।

क्राणा * * अवीवशद् ...

२०

अचिक्रदत्

... क्षरद् * वायोः *

कर्तवे

२१ * * * वि रोचयद् ...

८.९२.२८

२९

* * * मे *

३०

१.११.१

२

* * * णोनुमो ...

३

यदी ...

क ९.६२.१

२

तना * अर्वते

९.६५.१६

१८

१७ * * * शतग्विनं ...

प्राणा सिन्धूनां कलशं अचिक्रदद् इन्द्रस्य हार्द्य आविशन् मनीषिभिः ॥ ९ ॥

मनीषिभिः पवते पूर्व्यः कविर् नृभिर् यतः परि कोशं असिष्यदत् ।

त्रितस्य नाम जनयन् मधु क्षरन् इन्द्रस्य वायुं सख्याय वर्धयन् ॥ १० ॥

अयं पुनान उषसो अरोचयद् अयं सिन्धुभ्यो अभवद् उ लोककृत् ।

अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥ ११ ॥

एवा ह्य् असि वीरयुर् एवा शूर उत स्थिरः ।

एवा ते राध्यं मनः ॥ १२ ॥

एवा रातिस् तुवीमघ विश्वेभिर् धायि धातृभिः ।

अधा चिद् इन्द्र नः सचा ॥ १३ ॥

मो षु ब्रह्मेव तन्द्रयुर् भुवो वाजानां पते ।

मत्स्वा सुतस्य गोमतः ॥ १४ ॥

इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।

रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ १५ ॥

सख्ये त इन्द्र वाजिनो मा भेम शवसस् पते ।

त्वाम् अभि प्र नोनुमो जेतारम् अपराजितम् ॥ १६ ॥

पूर्वीर् इन्द्रस्य रातयो न वि दस्यन्त्य् ऊतयः ।

यदा वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ १७ ॥

॥ १६ ॥

३.१७

एते असृग्रम् इन्दवस् तिरः पवित्रम् आशवः ।

विश्वान्य् अभि सौभगा ॥ १ ॥

विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।

त्मना कृण्वन्तो अर्वतः ॥ २ ॥

कृण्वन्तो वरिवो गवे ऽभ्य् अर्षन्ति सुष्टुतिम् ।

इडाम् अस्मभ्यं संयतम् ॥ ३ ॥

राजा मेधाभिर् ईयते पवमानो मनाव् अधि ।

अन्तरिक्षेण यातवे ॥ ४ ॥

आ नः सोम सहो जुवो रूपं न वर्चसे भर ।

सुष्वाणो देववीतये ॥ ५ ॥

आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम् ।

वहा भगत्तिम् ऊतये ॥ ६ ॥

९.४८.१ तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः ।
* सुकृत्ययेमहे (एवं कौ) चारुं सुकृत्ययेमहि ॥ ७ ॥
२ संवृक्तधृष्णुम् उक्थ्यं महामहिव्रतं मदम् ।
शतं पुरो रुरुक्षणिम् ॥ ८ ॥
३ * * रयिमभि राजानं * * अतस् त्वा रयिर् अभ्य् अयद् राजानं सुक्रतो दिवः ।
* अव्यथिर् * सुपर्णो अव्यथी भरत् ॥ ९ ॥
४ विश्वस्मा इत् स्वर् दृशे साधारणं रजस्तुरम् ।
गोपाम् ऋतस्य विर् भरत् ॥ १० ॥
५ अधा हिन्वान इन्द्रियं ज्यायो महित्वम् आनशे ।
अभिष्टिकृद् विचर्षणिः ॥ ११ ॥
९.६४.१३ इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
इन्दो रुचाभि गा इहि ॥ १२ ॥
१४ पुनानो वरिवस् कृध्य् ऊर्जे जनाय गिर्वणः ।
हरे सृजान आशिरम् ॥ १३ ॥
१५ पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
* * यतः द्युतानो वाजिभिर् हितः ॥ १४ ॥ ॥ १७ ॥

३.१८

* १.१२.६ अग्निनाग्निः सम् इध्यते कविर् गृहपतिर् युवा ।
हव्यवाड् जुह्वास्यः ॥ १ ॥
८ यस् त्वाम् अग्ने हविष्पतिर् दूतं देव सपर्यति ।
तस्य स्म प्राविता भव ॥ २ ॥
९ यो अग्निं देववीतये हविष्मां आविवासति ।
* * मृळय (कौ मृडय) तस्मै पावक मृडया ॥ ३ ॥
१.२.७ मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताचीं साधन्ता ॥ ४ ॥
८ ऋतेन मित्रावरुणाव् ऋतावृधाव् ऋतस्पृशा ।
* * आशाथे (एवं कौ) ऋतुं बृहन्तम् आशथे ॥ ५ ॥
९ कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
दक्षं दधाते अपसम् ॥ ६ ॥
१.६.७ इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा ॥ ७ ॥
४ आद् अह स्वधाम् अनु पुनर् गर्भत्वम् एरिरे ।
दधाना नाम यज्ञियम् ॥ ८ ॥
५ वीळु (कौ वीड्)... वीदु चिद् आरुजत्नुभिर् गुहा चिद् इन्द्र वह्निभिः ।
अविन्द उस्रिया अनु ॥ ९ ॥

६.६०.४ ता हुवे ययोर् इदं पप्ने विश्वं पुरा कृतम् ।
इन्द्राग्नी न मर्धतः ॥ १० ॥

५ उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
ता नो मृडात ईदृशे ॥ ११ ॥

६ हतो * * हतो * * हथो वृत्राण्य् आर्या हथो दासानि सत्पती ।
हतो... हथो विश्वा अप द्विषः ॥ १२ ॥ ॥१८॥

३.१९

ऋ ९.१०७.१४ अभि सोमास आयवः पवन्ते मद्यं मदम् ।
* विष्टपि * * स्वर्विदः समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ १ ॥

१५ तरत् समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षन्... अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥२॥

१६ * येमानो... नृभिर् येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥ ३ ॥

९.९७.३४ तिस्रो वाच ईरयति प्र वह्निर् ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ४ ॥

३५ सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।

* * पूयते अज्यमानः... सोमः सुत ऋच्यते पूयमानः सोमे अर्कास् त्रिष्टुभः सं नवन्ते ॥ ५ ॥

३६ एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
* * * * रवेण... इन्द्रम् आ विश बृहता मदेन वर्धया वाचं जनया पुरंधिम् ॥ ६ ॥

८.७०.५ यद् द्याव इन्द्र ते शतं शतं भूमीर् उत स्युः ।
न त्वा वज्रिन् सहस्रं सूर्या अनु न जातम् अष्ट रोदसी ॥ ७ ॥

६ आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा ।
अस्मं अव मघवन् गोमति व्रजे वज्रिन् चित्राभिर् ऊतिभिः ॥ ८ ॥

८.३३.१ वयं घ त्वा सुतावन्तः आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥ ९ ॥

२ स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
...गमः * * कदा सुतं तृषाण ओक आ गमद् इन्द्र स्वब्दीव वंसगः ॥ १० ॥

३

७.३२.२०

२१ * दुष्टुती मर्त्यो विन्दते वसु
* * * *

कण्वेभिर् धृष्णव् आ धृषद् वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तम् ईमहे ॥ ११ ॥
तरणिर् इत् सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ १२ ॥
न दुष्टुतिर् द्रविणोदेषु शस्यते न स्रेधन्तं रयिर् नशत् ।
सुशक्तिर् इन् मघवन् तुभ्यं मावते देष्णं यत् पार्ये दिवि ॥ १३ ॥ ॥१९॥

३.२०

क ९.३३.४

५
मर्मृज्यन्ते * *
६ रायः (एवं कौ)...
...सहस्रिणः (एवं कौ)
९.१०८.७
वनक्रक्षम् *
९.१०४.१

९.१०१.४

५
* * मखस्यते (एवं कौ) ...। कौ ... ओजसः
६

९.८३.१

तिस्रो वाच उद् ईरते गावो मिमन्ति धेनवः ।
हरिर् एति कनिक्रदत् ॥ १ ॥
अभि ब्रह्मीर् अनूषत यह्वीर् ऋतस्य मातरः ।
मर्जयन्तीर् दिवः शिशुम् ॥ २ ॥
राये समुद्रांश् चतुरो ऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥ ३ ॥
आ सोता परि षिञ्चताश्वं न स्तोमम् अप्तुरं रजस्तुरम् ।
वनप्रक्षम् उदप्रुतम् ॥ ४ ॥
सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ ५ ॥
सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ६ ॥
इन्दुर् इन्द्राय पवत इति देवासो अब्रुवन् ।
वाचस् पतिर् मघस्यते विश्वस्येशान ओजसा ॥ ७ ॥
सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
सोमस् पती रयीणां सखेन्द्रस्य दिवेदिवे ॥ ८ ॥
पवित्रं ते विततं ब्रह्मणस् पते प्रभुर् गात्राणि पर्य् एषि विश्वतः ।
अतप्ततनूर् न तद् आमो अश्नुते श्रृतास इद् वहन्तः सं तद् आशत ॥ ९ ॥

तत् सम् (विपर्यासेन) *
२ कौ * * * * अर्चन्तो...

* * पवीतारम्...
* चेतसा । कौ रोहन्ति *
३ * * * * * बिभर्ति भुवनानि ।
कौ ... मिमेति *

तपोष् पवित्रं विततं दिवस् पदे शोचन्तो अस्य तन्तवो व्य् अस्थिरन् ।
अवन्त्य् अस्य पवितारम् आशवो दिवः पृष्ठम् अधि तिष्ठन्ति तेजसा ॥ १० ॥
अरूरुचद् उषसः पृश्निर् अग्रिय उक्षा मिमाति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भम् आ दधुः ॥ ११ ॥

८.१०३.८ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥ १२ ॥

९ ...द्युम्न्य् (एवं कौ) * आ वंसते मघवा वीरवद् यशः समिद्धो द्युम्न आहुतः ।
...नवीयस्य् * * कुविन् नो अस्य सुमतिर् भवीयस्य् अच्छा वाजेभिर् आगमत् ॥ १३ ॥

८.१५.४ ...पृत्सु * तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
उ लोककृत्नुम् अद्रिवो हरिश्रियम् ॥ १४ ॥

५ येन ज्योतींष्य् आयवे मनवे च विवेदिथ ।
मन्दानो अस्य बर्हिषो वि राजसि ॥ १५ ॥

६ तद् अद्या चित् त उक्थिनो अनु ष्टुवन्ति पूर्वथा ।
वृषपत्नीर् अपो जया दिवेदिवे ॥ १६ ॥

८.९५.४ श्रुधी हवं तिरश्च्या इन्द्र यस् त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस् पूर्धि महं असि ॥ १७ ॥

५ इन्द्र यस्ते (विपर्यासेन)... यस् त इन्द्र नवीयसीं गिरं मन्द्राम् अजीजनत् ।
चिकित्विन्मनसं धियं प्रत्नाम् ऋतस्य पिप्युषीम् ॥ १८ ॥

६ तम् उ ष्टवाम यं गिरं इन्द्रम् उक्थानि वावृधुः ।
पुरूण्य् अस्य पौंस्या सिषासन्तो वनामहे ॥ १९ ॥ ॥२०॥

३.२१

ऋ ९.८६.४ * * * * धीजुवो... प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन् पयसा धरीमणि ।

प्रान्तर्ऋषयः स्थाविरीरसृक्षत * * * ऋषिषाण * प्रान्तरिक्षात् स्थाविरीस् ते असृक्षत ये त्वा मृजन्त्य् उषिषाण वेधसः ॥ १ ॥

६ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।

...योना * यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥ २ ॥

५ ...प्रभोस्ते * * विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष् टे सतः परि यन्ति केतवः ।

व्यानशिः * * धर्मभिः... व्यानशी पवसे सोम धर्मणा पतिर् विश्वस्य भुवनस्य राजसि ॥ ३ ॥

९.६१.१६ पवमानो अजीजनद् दिवश् चित्रं न तन्यतुम् ।
ज्योतिर् वैश्वानरं बृहत् ॥ ४ ॥

१७ पवमानस्य ते रसो मदो राजन्न् अदुच्छुनः ।
कौ प्रथमपादयोर् विपर्यासः वि वारम् अव्यम् अर्षति ॥ ५ ॥

१८ पवमान रसस् तव दक्षो वि राजति द्युमान् ।
ज्योतिर् विश्वं स्वर् दृशे ॥ ६ ॥

९.४१.१ * ये...
प्र यद् गावो न भूर्णयस् त्वेषा अयासो अक्रमुः ।
घ्नन्तः कृष्णाम् अप त्वचम् ॥ ७ ॥

२ * मनामहे * * दुराध्यम्
साह्वांसो...
सुवितस्य वनामहे अति सेतुं दुराध्यम् ।
साह्याम दस्युम् अव्रतम् ॥ ८ ॥

३
शृण्वे वृष्टेर् इव स्वनः पवमानस्य शुष्मिणः ।
चरन्ति विद्युतो दिवि ॥ ९ ॥

४
आ पवस्व महीम् इषं गोमद् इन्दो हिरण्यवत् ।

* वाजवत् सुतः
अश्ववत् सोम वीरवत् ॥ १० ॥

५ स पवस्व विचर्षण * * * पृण (एवं कौ)
पवस्व विश्वचर्षण आ मही रोदसी पृणा ।
उषाः सूर्यो न रश्मिभिः ॥ ११ ॥

६ कौ * नः...
परि णः शर्मयन्त्या धारया सोम विश्वतः ।
सरा रसेव विष्टपम् ॥ १२ ॥

९.३९.१
आशुर् अर्ष बृहन्मते परि प्रियेण धाम्ना ।
यत्र देवा इति ब्रुवन् ॥ १३ ॥

२
परिष्कृण्वन्न् अनिष्कृतं जनाय यातयन्न् इषः ।
पृष्टिं दिवः परि स्रव ॥ १४ ॥

४
अयं स यो दिवस् परि रघुयामा पवित्र आ ।
सिन्धोर् ऊर्मा व्य् अक्षरत् ॥ १५ ॥

३
सुत एति पवित्र आ त्विषिं दधान ओजसा ।
विचक्षाणो विरोचयन् ॥ १६ ॥

५
आविवासन् परावतो अथो अर्वावतः सुतः ।
इन्द्राय सिच्यते मधु ॥ १७ ॥

६
समीचीना अनूषत हरिं हिन्वन्त्य् अद्रिभिः ।

योनावृतस्य सीदत
इन्दुम् इन्द्राय पीतये ॥ १८ ॥

९.६५.१
हिन्वन्ति सूरम् उस्रयः स्वसारो जामयस् पतिम् ।
महाम् इन्दुं महीयुवः ॥ १९ ॥

२ * रुचारुचा देवो देवेभ्यस्परि
...विश (एवं कौ)
पवमान रुधारुचा देव देवेभ्यः सुतः ।
विश्वा वसून्य् आ विशा ॥ २० ॥

३
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
इषे पवस्व संयतम् ॥ २१ ॥ ॥२१॥

३.२२

ऋ ६.१६.३४
अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया ।
समिद्धः शुक्र आहुतः ॥ १ ॥

३५
गर्भे मातुः पितुष् पिता विदिद्युतानो अक्षरे ।
सीदन्न् ऋतस्य योनिम् आ ॥ २ ॥

३६
ब्रह्म प्रजावद् आ भर जातवेदो विचर्षणे ।

अग्ने यद् दीदयद् दिवि ॥ ३ ॥
५.११.१ जनस्य गोपा अजनिष्ट जागृविर् अग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद् वि भाति भरतेभ्यः शुचिः ॥ ४ ॥
६ त्वाम् अग्ने अङ्गिरसो गुहा हितम् अन्व् अविन्दन् शिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत् त्वाम् आहुः सहसस् पुत्रम् अङ्गिरः ॥ ५ ॥
२ यज्ञस्य केतुं प्रथमं पुरोहितम् अग्निं नरस् त्रिषधस्थे सम् इन्धते ।
* * ईधिरे इन्द्रेण देवैः सरथं स बर्हिषि सीदन् नि होता यजथाय सुक्रतुः ॥ ६ ॥
२.४१.४ अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
ममेद् इह श्रुतं हवम् ॥ ७ ॥
५ राजानाव् अनभिद्रुहा ध्रुवे सदस्य् उत्तमे ।
* आसाते सहस्रस्थूण आशाते ॥ ८ ॥
६ ता सम्राजा घृतासुती आदित्या दानुनस् पती ।
सचेते अनवह्वरम् ॥ ९ ॥
१.८४.१३ इन्द्रो दधीचो अस्थभिर् वृत्राण्य् अप्रतिष्कुतः ।
जघान नवतीर् नव ॥ १० ॥
१४ इच्छन्न् अश्वस्य यच् छिरः पर्वतेष्व् अपश्रितम् ।
तद् विदच् छर्यणावति ॥ ११ ॥
१५ अत्राह गोर् अमन्वत नाम त्वष्टुर् अपीच्यम् ।
इत्था चन्द्रमसो गृहे ॥ १२ ॥
७.९४.१ इयं वाम् अस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
अभ्राद् वृष्टिर् इवाजनि ॥ १३ ॥
२ शृणुतं जरितुर् हवम् इन्द्राग्नी वनतं गिरः ।
ईशाना पिप्यतं धियः ॥ १४ ॥
३ मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
मा नो रीरधतं निदे ॥ १५ ॥ ॥२२॥

३.२३

ऋ ९.२५.१ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
मरुद्भ्यो वायवे मदः ॥ १ ॥
३ सं देवैः शोभते वृषा कविर् योनाव् अधि प्रियः ।

वृत्रहा देववीतमः
२
...विश । को * * आरुहः
९.१०७.१९

२० उताहं * * * * * सख्याय * *
...पस्मिम (एवं को)
९.४०.१

२ ...इन्द्रं * सुतः
...सीदति
३

७.२२.१

३

...जुषस्व (एवं को)
२

८.९७.१०

क्रत्वा वरिष्ठं वर आमुरिम् * * तवसं *

१२ ...अभिस्वरा

११ * ईं...
स्वर्पतिं यदीं...
८.७०.१
* * * ज्येष्ठः...
२
हस्ताय...महो दिवे * *

ऋ ९.९.१

पवमानो अदाभ्यः ॥ २ ॥
पवमान धिया हितो ऽभि योनिं कनिक्रदत् ।
धर्मणा वायुम् आ रुह ॥ ३ ॥
तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति माम् अव परिधींर् अति तं इहि ॥४॥
तवाहं नक्तम् उत सोम ते दिवा दुहानो बभ्र ऊधनि ।
घृणा तपन्तम् अति सूर्यं परः शकुना इव पप्तिमा ॥ ५ ॥
पुनानो अक्रमीद् अभि विश्वा मृधो विचर्षणिः ।
शुम्भन्ति विप्रं धीतिभिः ॥ ६ ॥
आ योनिम् अरुणो रुहद् गमद् इन्द्रो वृषा सुतम् ।
ध्रुवे सदसि सीदतु ॥ ७ ॥
नू नो रयिं महाम् इन्दो ऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥ ८ ॥
पिबा सोमम् इन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर् बाहुभ्यां सुयतो नार्वा ॥ ९ ॥
बोधा सु मे मघवन् वाचम् एमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्वा ॥ १० ॥
यस् ते मदो युज्यश् चारुर् अस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वाम् इन्द्र प्रभूवसो ममत्तु ॥ ११ ॥
विश्वा पृतना अभिभूतरं नरः सजूस् ततक्षुर् इन्द्रं जजनुश् च राजसे ।
क्रत्वे वरे स्थेमन्य् आमुरीम् उतोग्रम् ओजिष्ठं तरसं तरस्विनम् ॥ १२ ॥
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
सुदीतयो वो अद्रुहो ऽपि कर्णे तरस्विनः सम् ऋकभिः ॥ १३ ॥
सम् उ रेभासो अस्वरन् इन्द्रं सोमस्य पीतये ।
स्वःपतिर् यदी वृधे धृतव्रतो ह्य ओजसा सम् ऊतिभिः ॥१४॥
यो राजा चर्षणीनां याता रथेभिर् अध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १५ ॥
इन्द्रं तं शुम्भ पुरुहन्मन्न् अवसे यस्य द्विता विधर्तरि ।
हस्तेन वज्रः प्रति धायि दर्शतो महान् देवो न सूर्यः ॥ १६ ॥ ॥२३॥

३.२४

परि प्रिया दिवः कविर् वयांसि नप्त्योर् हितः ।

सुवानो ...
२ ...अद्रुहे
* * चनिष्ठया
३

९.१०८.३ * * * दैव्या ...
* घोषयः
४ * नवग्वो ...
...आनशुः
९.१०६.१० * * ऊर्मिणाव्यो (कौ [ऊर्मिणाव्यं) * * *
११ * हिन्वन्ति ...

१२ * * * मीळ्हे ...

९.९६.५

६

७ ...सोमः *

८.१०२.७

८

९

१.८४.४

६

स्वानैर् याति कविक्रतुः ॥ १ ॥
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
वीत्य् अर्ष पनिष्टये ॥ २ ॥
स सूनुर् मातरा शुचिर् जातो जाते अरोचयत् ।
महान् मही ऋतावृधा ॥ ३ ॥
त्वं ह्य् अङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयन् ॥ ४ ॥
येना नवग्वा दध्यङ्ङ् अपोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्य् आशत ॥ ५ ॥
सोमः पुनान ऊर्मिणा अव्यं वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥ ६ ॥
धीभिर् मृजन्ति वाजिनं वने क्रीडन्तम् अत्यविम् ।
अभि त्रिपृष्ठं मतयः सम् अस्वरन् ॥ ७ ॥
असर्जि कलशं अभि मीढ्वान् सप्तिर् न वाजयुः ।
पुनानो वाचं जनयन्न् असिष्यदत् ॥ ८ ॥
सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर् जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ९ ॥
ब्रह्मा देवानां पदवीः कवीनाम् ऋषिर् विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर् वनानां सोमः पवित्रम् अत्य् एति रेभन् ॥ १० ॥
प्रावीविपद् वाच ऊर्मिं न सिन्धुर् गिरः स्तोमान् पवमानो मनीषाः ।
अन्तः पश्यन् वृजनमावराण्य् आ तिष्ठति वृषभो गोषु जानन् ॥ ११ ॥
अग्निं वो वृधन्तम् अध्वराणां पुरूतमम् ।
अच्छा नप्त्रे सहस्वते ॥ १२ ॥
अयं यथा न आभुवत् त्वष्टा रूपेव तक्ष्या ।
अस्य क्रत्वा यशस्वतः ॥ १३ ॥
अयं विश्वा अभि श्रियो अग्निर् देवेषु पत्यते ।
आ वाजैर् उप नो गमत् ॥ १४ ॥
इमम् इन्द्र सुतं पिब ज्येष्ठम् अमर्त्यं मदम् ।
शुक्रस्य त्वाभ्य् अक्षरन् धारा ऋतस्य सादने ॥ १५ ॥
नकिष् ट्वद् रथीतरो हरी यद् इन्द्र यच्छसे ।

नकिष् ट्वानु मज्मना नकिः स्वश्व आनशे ॥ १६ ॥
५ इन्द्राय नूनम् अर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुर् इन्दवो ज्येष्ठं नमस्यता सहः ॥ १७ ॥ ॥२४॥

३.२५

ऋ ९.८६.३९ गोवित् पवस्व वसुविद् धिरण्यविद् रेतोधा इन्दो भुवनेष्व् अर्पितः ।
कौ ...नर * * त्वं सुवीरो असि सोम विश्ववित् तं त्वा विप्रा उप गिरेम आसते ॥ १ ॥
३८ त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद् धिरण्यवद् वयं स्याम भुवनेषु जीवसे ॥ २ ॥
३७ कौ * * * ईयसे... ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास् ते क्षरन्तु मधुमद् घृतं पयस् तव व्रते सोम तिष्ठन्तु कृष्टयः ॥ ३ ॥
९.६४.७ पवमानस्य विश्ववित् प्र ते सर्गा असृक्षत ।
सूर्यस्येव न रश्मयः ॥ ४ ॥
८ केतुं कृण्वन् दिवस् परि विश्वा रूपाभ्य् अर्षसि ।
समुद्रः सोम पिन्वसे ॥ ५ ॥
९ हिन्वानो... जज्ञानो वाचम् इष्यसि पवमान विधर्मणि ।
अक्रान् * * * क्रन्दं देवो न सूर्यः ॥ ६ ॥
९.२४.१ प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
* * सृज्यत श्रीणाना अप्सु वृञ्जते ॥ ७ ॥
२ अभि गावो अधन्विषुर् आपो न प्रवता यतीः ।
पुनाना इन्द्रम् आशत ॥ ८ ॥
३ * * * * पातवे प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
नृभिर् यतो वि नीयसे ॥ ९ ॥
५ ...परिधावसि इन्दो यद् अद्रिभिः सुतः पवित्रं परिधीयसे ।
अरम् इन्द्रस्य धाम्ने ॥ १० ॥ ॥ २५ ॥

३.२६

ऋ ९.२४.४ ...चर्षणीसहे त्वं सोम नृमादनः पवस्व चर्षणीधृतिः ।
सस्निर् यो अनुमाद्यः ॥ १ ॥
६ * वृत्रहन्तमोक्थेभिर् * पवस्व वृत्रहन्तम उक्थेभिर् अनुमाद्यः ।
शुचिः पावको अद्भुतः ॥ २ ॥
७ * * * * सुतस्य मध्वः शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।

देवावीर् अघशंसहा ॥ ३ ॥
९.२०.१ * * * ऽव्यो * अर्षति — प्र कविर् देववीतये अव्या वारेभिर् अव्यत ।
साह्वान् विश्वा अभि स्पृधः ॥ ४ ॥
२ — स हि ष्मा जरितृभ्य आ वाजं गोमन्तम् इन्वति ।
* सहस्रिणम् (एवं कौ) — पवमानः सषासति ॥ ५ ॥
३ * * * मृशसे... — परि विश्वानि चेतसा मृज्यसे पवसे मती ।
स नः सोम श्रवो विदः ॥ ६ ॥
४ — अभ्य् अर्ष बृहद् यशो मघवद्भ्यो ध्रुवं रयिम् ।
इषं स्तोतृभ्य आ भर ॥ ७ ॥
५ — त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ।
पुनानो वह्ने अद्भुत ॥ ८ ॥
६ — स वह्निर् अप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
सोमश् चमूषु सीदति ॥ ९ ॥
७ क्रीळर्मघो... । कौ क्रीदुर्... — क्रीडुर् मघो न मंहयुः पवित्रं सोम गच्छसि ।
दधत् स्तोत्रे सुवीर्यम् ॥ १० ॥ ॥ २६ ॥

३.२७

ऋ ९.५५.१ — यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव ।
सोम विश्वा च * — विश्वा च सोम सौभगा ॥ १ ॥
२ — इन्दो यथा तव स्तवो यथा ते जातम् अन्धसः ।
नि बर्हिषि प्रिये सदः ॥ २ ॥
३ — उत नो गोविद् अश्ववित् पवस्व सोमान्धसा ।
मक्षूतमेभिर् अहभिः ॥ ३ ॥
४ — यो जिनाति न जीयते हन्ति शत्रुम् अभीत्य ।
स पवस्व सहस्रजित् ॥ ४ ॥
९.६२.७ — यास् ते धारा मधुश्चुतो असृग्रम् इन्द ऊतये ।
ताभिः पवित्रम् आसदः ॥ ५ ॥
८ ... रोमाण्य् * सीदन्योना वनेष्वा — सो अर्षेन्द्राय पीतये तिरो वाराण्य् अव्यया ।
सीदन्न् ऋतस्य योनिम् आ ॥ ६ ॥
९ * इन्दो... — त्वं सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।
वरिवोविद् घृतं पयः ॥ ७ ॥ ॥ २७ ॥

३.२८

ऋ ५.१३.२ * * मनामहे (एवं कौ)... — अग्नेः स्तोमं वनामहे सिध्रम् अद्य दिविस्पृशः ।
देवस्य द्रविणस्यवः ॥ १ ॥
३ — अग्निर् जुषत नो गिरो होता यो मानुषेष्व् आ ।
स यक्षद् दैव्यं जनम् ॥ २ ॥
४ — त्वम् अग्ने सप्रथा असि जुष्टो होता वरेण्यः ।

१०.९१.५ ...चित्राश् * * । कौ * * * * अग्नेश्चिकित्र * न केतवः

त्वया यज्ञं वि तन्वते ॥ ३ ॥

* आस्ये

तव श्रियो वर्ष्यस्येव विद्युतो अग्ने चिकित्व उषसाम् इवेतयः ।

७ वातोपधूत...

यद् ओषधीर् अभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नम् आसनि ॥ ४ ॥

...अजराणि

वातोपजूत इषितो वशं अनु तृषु यद् अन्ना वेविषद् वितिष्ठसे ।

८ कौ ...परिभूतरं

आ ते यतन्ते रथ्यो यथा पृथक् शर्धांस्य् अग्ने अजरस्य धक्षतः ॥ ५ ॥

तमिदर्भे हविष्या * * तमिन्महे *

मेधाकारं विदथस्य प्रसाधनम् अग्निं होतारं परिभूतमं मतिम् ।

५.७०.१

त्वाम् अर्भस्य हविषः समानम् इत् त्वां महो वृणते नान्यं त्वत् ॥ ६ ॥

पुरूरुणा चिद् ध्य् अस्त्य् अवो नूनं वां वरुण ।
मित्र वंसि वां सुमतिम् ॥ ७ ॥

२ * * * * * धायसे

ता वां सम्यग् अद्रुहाणेषम् अश्याम धाम च ।
वयं वां मित्रा स्याम ॥ ८ ॥

* ते रुद्रा *

३ * * रुद्रा...

पातं नो मित्रा पायुभिर् उत त्रायेथां सुत्रात्रा ।
साह्याम दस्यून् तनूभिः ॥ ९ ॥

तुर्याम * * । कौ * दस्यूं *

८.७६.१० * * * पीत्वी...

उत्तिष्ठन् ओजसा सह पीत्वा शिप्रे अवेपयः ।
सोमम् इन्द्र चमू सुतम् ॥ १० ॥

११ * * * * ऋक्षमाणमकृपेताम्। कौ ...अददेताम्

अनु त्वा रोदसी उभे स्पर्धमानम् अददाताम् ।
इन्द्र यद् दस्युहाभुवः ॥ ११ ॥

* * °भवः (एवं कौ)

वाचम् अष्टापदीम् अहं नवस्रक्तिम् ऋतावृधम् ।
इन्द्रात् परि तन्वं ममे ॥ १२ ॥

१२ ...ऋतस्पृशम्

इन्द्राग्नी युवाम् इमे ऽभि स्तोमा अनूषत ।
पिबतं शंभुवा सुतम् ॥ १३ ॥

६.६०.७

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
इन्द्राग्नी ताभिर् आ गतम् ॥ १४ ॥

८

ताभिर् आ गच्छतं नरोपेदं सवनं सुतम् ।
इन्द्राग्नी सोमपीतये ॥ १५ ॥ ॥२८॥

९

३.२९

ऋ ९.६५.१९

अर्षा सोम द्युमत्तमो ऽभि द्रोणानि रोरुवत् ।

* इयेनो न योनिमा

सीदन् योनौ वनेष्व् आ ॥ १ ॥

२०

अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

सोमो अर्षति *	सोमा अर्षन्तु विष्णवे ॥ २ ॥
२१	इषं तोकाय नो दधद् अस्मभ्यं सोम विश्वतः ।
	आ पवस्व सहस्रिणम् ॥ ३ ॥
९.१०७.८ * * पुवाणः...	सोम उ ष्वाणः सोतृभिर् अधि ष्णुभिर् अवीनाम् ।
	अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ४ ॥
९	अनूपे गोमान् गोभिर् अक्षाः सोमो दुग्धाभिर् अक्षाः ।
	समुद्रं न संवरणान्य् अग्मन् मन्दी मदाय तोशते ॥ ५ ॥
९.१९.१	यत् सोम चित्रम् उक्थ्यं दिव्यं पार्थिवं वसु ।
	तन् नः पुनान आ भर ॥ ६ ॥
३ * * आयुषु...	वृषा पुनान आयूंषि स्तनयन्न् अधि बर्हिषि ।
...आसदत्	हरिः सन् योनिम् आसदः ॥ ७ ॥
२ * * * स्वर्पती...	युवं हि स्थः स्वःपती इन्द्रश् च सोम गोपती ।
	ईशाना पिप्यतं धियः ॥ ८ ॥
१.८१.१	इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
* * * आजिषूतेम्...	तम् इन् महत्स्व् आजिषूतिम् अर्भे हवामहे स वाजेषु
	प्र नो ऽविषत् ॥ ९ ॥
२	असि हि वीर सन्यो ऽसि भूरि पराददिः ।
	असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते
	भूरि ते वसु ॥ १० ॥
३ ...धना	यद् उदीरत आजयो धृष्णवे धीयते धनम् ।
युङ्क्ष्वा...	युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्मं
	इन्द्र वसौ दधः ॥ ११ ॥
१.८४.१० * * * मध्वः...	स्वादोर् इत्था विषूवतो मधोः पिबन्ति गौर्यः ।
...शोभसे *	या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभथा वस्वीर्
	अनु स्वराज्यम् ॥ १२ ॥
११	ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
	प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीर् अनु
	स्वराज्यम् ॥ १३ ॥
१२	ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
	व्रतान्य् अस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीर् अनु
	स्वराज्यम् ॥ १४ ॥ ॥ २९ ॥

३.३०

ऋ ९.६२.४	असाव्य् अंशुर् मदायाप्सु दक्षो गिरिष्ठाः ।
	श्येनो न योनिम् आसदत् ॥ १ ॥
५ ...धूतो * सुतः	शुभ्रम् अन्धो देववातम् अप्सु धौतं नृभिः सुतम् ।
	स्वदन्ति गावः पयोभिः ॥ २ ॥

६ * ईम् (एवं कौ) * * हेतारो ...
मध्वो ...
९.१०८.९ ... दिदीहि (एवं कौ) * देवयुः

१०
... अपां जिन्व *

९.१०२.१ क्राणा ...

३ ...एरय *

२

९.१००.६ * वाजासातमः ...
कौ ... मधुमत्तरः
७ * * मातरो ...
* * * धेनवः पवमान *

९

९.९७.१०

* * * * अरातीर् ...

११

१२ * प्रियाणि ...

५.६.४

५ ...शोचिषस् *

आद् ईं अश्वं न हेतारम् अशूशुभन्न् अमृताय ।
मधो रसं सधमादे ॥ ३ ॥
अभि द्युम्नं बृहद् यश इषस् पते दीदिहि देव देवयुम् ।
वि कोशं मध्यमं युवा ॥ ४ ॥
आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर् न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिम् अपो जिन्वन् गविष्टये धियः ॥ ५ ॥
प्राणा शिशुर् महीनां हिन्वन्न् ऋतस्य दीधितिम् ।
विश्वा परि प्रिया भुवद् अध द्विता ॥ ६ ॥
त्रीणि त्रितस्य धारया पृष्ठेष्व् एरयद् रयिम् ।
मिमीते अस्य योजना वि सुक्रतुः ॥ ७ ॥
उप त्रितस्य पाष्योर् अभक्त यद् गुहा पदम् ।
यज्ञस्य सप्त धामभिर् अध प्रियम् ॥ ८ ॥
पवस्व वाजसातये पवित्रे धारया सुतः ।
इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥ ९ ॥
त्वां रिहन्ति धीतयो हरिं पवित्रे अद्रुहः ।
वत्सं जातं न मातरः पवमाना विधर्मणि ॥ १० ॥
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
प्रति द्रापिम् अमुञ्चथाः पवमान महित्वना ॥ ११ ॥
इन्दुर् वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
हन्ति रक्षो बाधते पर्य् अरातिं वरिवः कृण्वन् वृजनस्य राजा ॥ १२ ॥
अध धारया मध्वा पृचानस् तिरो रोम पवते अद्रिदुग्धः ।
इन्दुर् इन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ १३ ॥
अभि व्रतानि पवते पुनानो देवो देवान् स्वेन रसेन पृञ्चन् ।
इन्दुर् धर्माण्य् ऋतुथा वसानो दश क्षिपो ऽव्यत सानो अव्ये ॥ १४ ॥
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद् ध स्या ते पनीयसी समिद् दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ १५ ॥
आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस् पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥ १६ ॥

९ उभे * सर्पिषो ...
ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
उतो न उत् पुपूर्या उक्थेषु शवसस् पत इषं स्तोतृभ्य आ भर ॥ १७ ॥

८.९८.१
इन्द्राय साम गायत विप्राय बृहते बृहत् ।
धर्मकृते ... ब्रह्मकृते विपश्चिते पनस्यवे ॥ १८ ॥

२
त्वम् इन्द्राभिभूर् असि त्वं सूर्यम् अरोचयः ।
विश्वकर्मा विश्वदेवो महां असि ॥ १९ ॥

३ विभ्राजन्...
विभ्राजं ज्योतिषा स्वर् अगच्छो रोचनं दिवः ।
देवास् त इन्द्र सख्याय येमिरे ॥ २० ॥

१.८४.१
असावि सोम इन्द्र ते शविष्ठ धृष्णव् आ गहि ।
आ त्वा पृणक्त्व् इन्द्रियं रजः सूर्यो न रश्मिभिः ॥ २१ ॥

३
आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ २२ ॥

२
इन्द्रम् इद् धरी वहतो ऽप्रतिधृष्टशवसम् ।
ऋषीणां च सुष्टुतीर् * * * * ऋषीणां सुष्टुतीर् उप यज्ञं च मानुषाणाम् ॥ २३ ॥ ॥३०॥

३.३१

क ९.८६.१०
ज्योतिर् यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोर् अपीच्यं मदिंतमो मत्सर इन्द्रियो रसः ॥ १ ॥

११
अभिक्रन्दन् कलशं वाज्य् अर्षति पतिर् दिवः शतधारो विचक्षणः ।
हरिर् मित्रस्य सदनेषु सीदति मर्मृजानो ऽविभिः सिन्धुभिर् वृषा ॥ २ ॥

१२ * * * अर्षत्य्...
अग्रे सिन्धूनां पवमानो अर्षस्य् अग्रे वाचो अग्रियो गोषु गच्छसि ।

* * भजते महाधनं * *
अग्रे वाजस्य भजसे महद् धनं स्वायुधः सोतृभिः सोम सूयसे ॥ ३ ॥

पूयते वृषा
९.६४.४
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
शुक्रासो वीरयाशवः ॥ ४ ॥

५
शुम्भमाना ऋतायुभिर् मृज्यमाना गभस्त्योः ।
पवन्ते वारे अव्यये ॥ ५ ॥

६
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।
पवन्ताम् आन्तरिक्ष्या ॥ ६ ॥

९.२.१
पवस्व देववीर् अति पवित्रं सोम रंह्या ।
इन्द्रम् इन्दो वृषा विश ॥ ७ ॥

२	आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।
	आ योनिं धर्णसिः सदः ॥ ८ ॥
३	अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।
	अपो वसिष्ट सुक्रतुः ॥ ९ ॥
४	महान्तं त्वा महीर् अन्व् आपो अर्षन्ति सिन्धवः ।
	यद् गोभिर् वासयिष्यसे ॥ १० ॥
५	समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
	सोमः पवित्रे अस्मयुः ॥ ११ ॥
६	अचिक्रदद् वृषा हरिर् महान् मित्रो न दर्शतः ।
* * रोचते	सं सूर्येण दिद्युते ॥ १२ ॥
७	गिरस् त इन्द्र ओजसा मर्मृज्यन्ते अपस्युवः ।
	याभिर् मदाय शुम्भसे ॥ १३ ॥
८	तं त्वा मदाय घृष्वय उ लोककृत्नुम् ईमहे ।
* प्रशस्तयो महीः	तव प्रशस्तये महे ॥ १४ ॥
१०	गोषा इन्दो नृषा अस्य् अश्वसा वाजसा उत ।
	आत्मा यज्ञस्य पूर्व्यः ॥ १५ ॥
९ * * इन्द्रयुर् मध्वः * *	अस्मभ्यम् इन्दव् इन्द्रियं मधोः पवस्व धारया ।
	पर्जन्यो वृष्टिमं इव ॥ १६ ॥
९.४.१	सना च सोम जेषि च पवमान महि श्रवः ।
	अथा नो वस्यसस् कृधि ॥ १७ ॥
२	सना ज्योतिः सना स्वर् विश्वा च सोम सौभगा ।
	अथा नो वस्यसस् कृधि ॥ १८ ॥
३	सना दक्षम् उत क्रतुम् अप सोम मृधो जहि ।
	अथा नो वस्यसस् कृधि ॥ १९ ॥
४	पवीतारः पुनीतन सोमम् इन्द्राय पातवे ।
	अथा नो वस्यसस् कृधि ॥ २० ॥
५ * * न (एवं सौ)...	त्वं सूर्ये ण आ भज तव क्रत्वा तवोतिभिः ।
	अथा नो वस्यसस् कृधि ॥ २१ ॥
६	तव क्रत्वा तवोतिभिर् ज्योक् पश्येम सूर्यम् ।
	अथा नो वस्यसस् कृधि ॥ २२ ॥
७	अभ्य् अर्ष स्वायुध सोम द्विबर्हसं रयिम् ।
	अथा नो वस्यसस् कृधि ॥ २३ ॥
८ * * रयिं * *	अभ्य् अर्षानपच्युतो वाजिन् समत्सु सासहिः ।
	अथा नो वस्यसस् कृधि ॥ २४ ॥
९	त्वां यज्ञैर् अवीवृधन् पवमान विधर्मणि ।
	अथा नो वस्यसस् कृधि ॥ २५ ॥

१० रयिं नश् चित्रम् अश्विनम् इन्दो विश्वायुम् आ भर ।
अथा नो वस्यसस् कृधि ॥ २६ ॥

९.५८.१ तरत् स मन्दी धावति धारा सुतस्यान्धसः ।
तरत् स मन्दी धावति ॥ २७ ॥

२ उस्रा वेद वसूनां मर्तस्य देव्य् अवसः ।
तरत् स मन्दी धावति ॥ २८ ॥

३ ध्वस्रयोः पुरुषन्त्योर् आ सहस्राणि दद्महे ।
तरत् स मन्दी धावति ॥ २९ ॥

४ आ ययोस् त्रिंशतं तना सहस्राणि च दद्महे ।
तरत् स मन्दी धावति ॥ ३० ॥

९.६२.२२ एते सोमा असृक्षत गृणानाः शवसे महे ।
मदिंतमस्य धारया ॥ ३१ ॥

२३ अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
सनद्वाजः परि स्रव ॥ ३२ ॥

२४ उत नो गोमतीर् इषो विश्वा अर्ष परिष्टुभः ।
गृणानो जमदग्निना ॥ ३३ ॥ ॥३१॥

३.३२

* १०.१८७.१ प्राग्नये वाचम् ईरय वृषभाय क्षितीनाम् ।
स नः पर्षद् अति द्विषः ॥ १ ॥

२ यः परस्याः परावतस् तिरो धन्वातिरोचते ।
स नः पर्षद् अति द्विषः ॥ २ ॥

४ यो विश्वाभि विपश्यति भुवना सं च पश्यति ।
स नः पर्षद् अति द्विषः ॥ ३ ॥

१.९४.१ इमं स्तोमम् अर्हते जातवेदसे रथम् इव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिर् अस्य संसद् अग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥

४ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
* प्रतरं... जीवातवे प्रतरां साधया धियो ऽग्ने सख्ये मा रिषामा वयं तव ॥ ५ ॥

३ शकेम त्वा समिधं साधया धियस् त्वे देवा हविर् अदन्त्य् आहुतम् ।
त्वम् आदित्यं आ वह तान् ह्य् उश्मस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ६ ॥

७.६६.७ प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् ।

अर्यमणं रिशादसम् ॥ ७ ॥
८ राया हिरण्यया मतिर् इयम् अवृकाय शवसे ।
इयं विप्रा मेधसातये ॥ ८ ॥
९ ते स्याम देव वरुण ते मित्र सूरिभिः सह ।
इषं स्वश् च धीमहि ॥ ९ ॥
८.४५.४० भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
वसु स्पार्हं तद् आ भर ॥ १० ॥
४२ * * विश्वमानुषो * * * यस्य ते विश्वम् आनुषग् भूरेर् दत्तस्य वेदति ।
वसु स्पार्हं तद् आ भर ॥ ११ ॥
४१ यद् वीडाव् इन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् ।
वसु स्पार्हं तद् आ भर ॥ १२ ॥
८.३८.१ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
इन्द्राग्नी तस्य बोधतम् ॥ १३ ॥
२ इदं वां मदिरं मध्व् अधुक्षन्न् अद्रिभिर् नरः ।
इन्द्राग्नी तस्य बोधतम् ॥ १४ ॥
३ तोशासा रथयावाना वृत्रहणापराजिता ।
इन्द्राग्नी तस्य बोधतम् ॥ १५ ॥ ॥३२॥

३.३३

ऋ ९.६४.२२ इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
ऋतस्य ... अर्कस्य योनिम् आसदम् ॥ १ ॥
२३ ...वेधसः तं त्वा विप्रा वचोविदः परिष् कृण्वन्ति धर्णसिम् ।
सं त्वा मृजन्त्य् आयवः ॥ २ ॥
२४ * * * * पिबन्ति ... रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
पवमानस्य मरुतः ॥ ३ ॥
९.१०७.२१ * सुहस्त्य... मृज्यमानः सुहस्त्या समुद्रे वाचम् इन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्य् अर्षसि ॥ ४ ॥
२२ मृजानो * * * वृषाव चक्रदो * पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद् वने ।
देवानां सोम पवमान निष्कृतं गोभिर् अञ्जानो अर्षसि
॥ ५ ॥
९.६१.७ एतम् उ त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।
सम् आदित्येभिर् अख्यत ॥ ६ ॥
८ सम् इन्द्रेणोत वायुना सुत एति पवित्र आ ।
* सूर्यस्य (एवं कौ) * सं सूर्येण रश्मिभिः ॥ ७ ॥
९ स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।
चारुर् मित्रे वरुणे च ॥ ८ ॥
१.३०.१३ * नः (एवं को)... रेवतीर् णः सधमाद इन्द्रे सन्तु तुविवाजाः ।

श्रुमन्तो याभिर् मदेम ॥ ९ ॥
१४ * * * त्मनाप्तः * * इयानः — आ घ त्वावान् त्मना युक्तः स्तोतृभ्यो धृष्णव् ईयानः ।
ऋणोर् अक्षं न चक्रयोः ॥ १० ॥
१५ — आ यद् दुवः शतक्रतव् आ कामं जरितॄणाम् ।
ऋणोर् अक्षं न शचीभिः ॥ ११ ॥
१.४.१ — सुरूपकृत्नुम् ऊतये सुदुघाम् इव गोदुहे ।
जुहूमसि द्यविद्यवि ॥ १२ ॥
३ — अथा ते अन्तमानां विद्याम सुमतीनाम् ।
मा नो अति ख्य आ गहि ॥ १३ ॥
२ — उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद् रेवतो मदः ॥ १४ ॥
१०.१३४.१ — उभे यद् इन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १५ ॥
६ — दीर्घं ह्य् अङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
* * पदाजो वयां * * — पूर्वेण मघवन् पदा वयाम् अजो यथा यमः ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १६ ॥
३ — अव त्या बृहतीर् इषो विश्वश्चन्द्रा अमित्रहन् ।
* * धूनुहीन्द्र * * — शचीभिः शक्र धूनुष इन्द्र विश्वाभिर् ऊतिभिः ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १७ ॥

॥ ३३ ॥

३.३४

क ९.१८.१ * सुवानो ... अक्षाः — परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
मदेषु सर्वधा असि ॥ १ ॥
२ — त्वं विप्रस् त्वं कविर् मधु प्र जातम् अन्धसः ।
मदेषु सर्वधा असि ॥ २ ॥
३ तव ... — त्वे विश्वे सजोषसो देवासः पीतिम् आशत ।
मदेषु सर्वधा असि ॥ ३ ॥
९.१०८.१३ — स सुन्वे यो वसूनां यो रायाम् आनेता य इडानाम् ।
सोमो यः सुक्षितीनाम् ॥ ४ ॥
१४ * न ... वार्यमणा (एवं कौ) * — यस्य त इन्द्रः पिबाद् यस्य मरुतो यस्य वार्यम्णा भगः ।
आ येन मित्रावरुणा करामह एन्द्रम् अवसे महे ॥ ५ ॥
९.१०५.१ — तं वः सखायो मदाय पुनानम् अभि गायत ।
* * यज्ञैः * * — शिशुं न हव्यैः खदयन्त गूर्तिभिः ॥ ६ ॥
२ — सं वत्स इव मातृभिर् इन्दुर् हिन्वानो अज्यते ।
देवावीर् मदो मतिभिः परिष्कृतः ॥ ७ ॥

३
कौ * * मधुमत्तरः *
९.१०१.१०
* सुवाना...
११ एते पूताः...
सूर्यासो...
१२

९.९७.५२
* * अत्र * * जूतः पुरुमेधश् * *
* दात्
५३

५४

५.२४.१ ...भवा *
२ ...द्युमत्तमं * *

४

१०.१५७.१ ...सीषधामेन्द्रश्...
२ ...चीक्लृपाति
३ * * * * अस्माकं भूत्वविता [तनूनाम्

ऋग्वेदे न सन्ति

ऋ ९.९७.७

अयं दक्षाय साधनो ऽयं शर्धाय वीतये ।
अयं देवेभ्यो मधुमत्तमः सुतः ॥ ८ ॥
सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ९ ॥
ते पूतासो विपश्चितः सोमासो दध्याशिरः ।
सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ १० ॥
सुष्वाणासो व्य् अद्रिभिश् चिताना गोर् अधि त्वचि ।
इषम् अस्मभ्यम् अभितः सम् अस्वरन् वसुविदः ॥ ११ ॥
अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश् चिद् यस्य वातो न जूतिं पुरुमेधाश् चित् तकवे नरं धात् ॥ १२ ॥
उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद् रणाय ॥ १३ ॥
महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन् निगुतः स्नेहयच् चापामित्रं अपाचितो अचेतः ॥ १४ ॥
अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ १५ ॥
वसुर् अग्निर् वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ १६ ॥
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनम् ईमहे सखिभ्यः ॥ १७ ॥
इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवाः ॥ १८ ॥
यज्ञं च नस् तन्वं च प्रजां चादित्यैर् इन्द्रः सह सीषधातु ॥ १९ ॥
आदित्यैर् इन्द्रः सगणो मरुद्भिर् अस्मभ्यं भेषजा करत् ॥ २० ॥
प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ २१ ॥
अर्चन्त्य् अर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ २२ ॥
उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द ॥ २३ ॥ ॥३४॥

३.३५

प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ॥ १ ॥

८ * * तृपलं मन्युम् * * * | प्र हंसासस् तृपला वग्नुम् अच्छामाद् अस्तं वृषगणा अयासुः ।
आङ्क्ष्यं * * * साकं * * वाणम् | अङ्क्षोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥ २ ॥
९ * रंहत... | स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृङ्गो हरिर् दृदृशे नक्तम् ऋज्रः ॥ ३ ॥
९.१०.१ | प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः ।
सोमासो राये अक्रमुः ॥ ४ ॥
२ | हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।
भरासः कारिणाम् इव ॥ ५ ॥
३ | राजानो न प्रशस्तिभिः सोमासो गोभिर् अञ्जते ।
यज्ञो न सप्त धातृभिः ॥ ६ ॥
४ * सुवानास... | परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
सुता... | मधो अर्षन्ति धारया ॥ ७ ॥
५ * * जनन्त... | आपानासो विवस्वतो जिन्वन्त उषसो भगम् ।
सूरा अण्वं वि तन्वते ॥ ८ ॥
६ | अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः ।
वृष्णो हरस आयवः ॥ ९ ॥
८ * * * * * चक्षुश्चित्सूर्ये सचा | नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे ।
कवेर् अपत्यम् आ दुहे ॥ १० ॥ ॥३५॥

३.३६

क ९.१०.७ * आसते... । कौ... सप्त- [जानयः | समीचीनास आशत होतारः सप्तजामयः ।
पदम् एकस्य पिप्रतः ॥ १ ॥
९ * प्रिया... | अभि प्रियं दिवस् पदम् अध्वर्युभिर् गुहा हितम् ।
सूरः पश्यति चक्षसा ॥ २ ॥
९.७.१ | असृग्रम् इन्दवः पथा धर्मन्न् ऋतस्य सुश्रियः ।
* * योजनम् | विदाना अस्य योजना ॥ ३ ॥
२ * * मध्वो... | प्र धारा मधो अग्रियो महीर् अपो वि गाहते ।
हविर् हविःषु वन्द्यः ॥ ४ ॥
३ * युजो * * वृषाव चक्रदद् * | प्र युजा वाचो अग्रियो वृषो अचिक्रदद् वने ।
सद्माभि सत्यो अध्वरः ॥ ५ ॥
४ ...वसानो * | परि यत् काव्या कविर् नृम्णा पुनानो अर्षति ।
स्वर् वाजी सिषासति ॥ ६ ॥
५ | पवमानो अभि स्पृधो विशो राजेव सीदति ।
यद् ईम् ऋण्वन्ति वेधसः ॥ ७ ॥

६ अव्यो...
...मती (एवं कौ)
७
...धर्मभिः
८ * मित्रावरुणा भगं मध्वः * *

अव्या वारे परि प्रियो हरिर् वनेषु सीदति ।
रेभो वनुष्यते मही ॥ ८ ॥
स वायुम् इन्द्रम् अश्विना साकं मदेन गच्छति ।
रणा यो अस्य धर्मणा ॥ ९ ॥
आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः ।
विदाना अस्य शक्मभिः ॥ १० ॥ ॥३६॥

३.३७

* ९.७.९
९.६५.२८
२९
३०

अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये ।
श्रवो वसूनि सं जितम् ॥ १ ॥
आ ते दक्षं मयोभुवं वह्निम् अद्या वृणीमहे ।
पान्तम् आ पुरुस्पृहम् ॥ २ ॥
आ मन्द्रम् आ वरेण्यम् आ विप्रम् आ मनीषिणम् ।
पान्तम् आ पुरुस्पृहम् ॥ ३ ॥
आ रयिम् आ सुचेतनम् आ सुक्रतो तनूष्व् आ ।
पान्तम् आ पुरुस्पृहम् ॥ ४ ॥ ॥३७॥

३.३८

अन्यत्र संहितासु न सन्ति

वैश्वानरो अजीजनद् अग्निर् नो नव्यसीं मतिम् ।
क्ष्मया वृधा न ओजसा ॥ १ ॥
दिवि पृष्टो अरोचताग्निर् वैश्वानरो बृहत् ।
ज्योतिषा बाधते तमः ॥ २ ॥
स नः पावक दीदिह्य् अग्ने वैश्वानर द्युमान् ।
जमदग्नेर् भराहुतः ॥ ३ ॥

* ६.७.१
* * * * आसन्ना...
४
२
५.६८.१

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
कविं सम्राजम् अतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः ॥ ४ ॥
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिर् अमृतत्वम् आयन् वैश्वानर यत् पित्रोर् अदीदेः ॥ ५ ॥
नाभिं यज्ञानां सदनं रयीणां महाम् आहावम् अभि सं नवन्त ।
वैश्वानरं रथ्यम् अध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ ६ ॥
प्र वो मित्राय गायत वरुणाय विपा गिरा ।

महिक्षत्राव् ऋतं बृहत् ॥ ७ ॥
२ सम्राजा या घृतयोनी मित्रश् चोभा वरुणश् च ।
देवा देवेषु प्रशस्ता ॥ ८ ॥
३ ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
महि वां क्षत्रं देवेषु ॥ ९ ॥
१.३.४ इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
अण्वीभिस् तना पूतासः ॥ १० ॥
५ इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
उप ब्रह्माणि वाघतः ॥ ११ ॥
६ इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुत दधिष्व नश् चनः ॥ १२ ॥ ॥३८॥

३.३९

ऋ ९.८६.१६ प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतं सखा सख्युर् न प्र मिनाति संगिरम् ।
...शतयाम्ना मर्य इव युवतिभिः सम् अर्षति सोमः कलशे शतयामना पथा ॥ १ ॥
१७ ...संवसनेषु प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्व् अकृमुः ।
सोमं मनीषा * * * * * पयसेम् हरिं क्रीडन्तम् अभ्य् अनूषत स्तुभो ऽभि धेनवः पयसेद् अशिश्रयुः ॥ २ ॥
१८ अस्रिधम् आ नः सोम संयतं पिप्युषीम् इषम् इन्दो पवस्व पवमान ऊर्मिणा ।
या नो दोहते त्रिर् अहन्न् असश्चुषी क्षुमद् वाजवन् मधुमत् सुवीर्यम् ॥ ३ ॥
८.७०.३ नकिष् टं कर्मणा नशद् यश् चकार सदावृधम् ।
...धृष्णवोजसम् इन्द्रं न यज्ञैर् विश्वगूर्तम् ऋभ्वसम् अधृष्टं धृष्णुम् ओजसा ॥ ४ ॥
४ अषाढम् उग्रं पृतनासु सासहिं यस्मिन् महीर् उरुज्रयः ।
* * * * द्यावः क्षामो (कौ द्यावः क्षामीर्) * सं धेनवो जायमाने अनोनवुर् प्राव क्षामैर् अनोनवुः ॥ ५ ॥ ॥३९॥

३.४०

ऋ ९.१०८.५ * * * * ऽव्यो... एष स्य धारया सुतो ऽव्या वारेभिः पवते मदिन्तमः ।
६ * * अप्या अन्तरश्मनो * * * क्रीडन्न् ऊर्मिर् अपाम् इव ॥ १ ॥
य उस्रिया अपिया अन्तर् अश्मनि निर् गा अकृन्तद् ओजसा ।

रुज (एवं कौ)
९.१०४.१

२ ...गयसाधनम् (एवं कौ)

३
...शंतमः
९.१०९.१६ * सुवानो...

१७

१८ ...येमानो *

९.६५.२२

२३

२४
सुवाना...
८.११.७
* त्वांकामया *
८ * * * * विशो...

९

८.९८.१०
* * पृतनाषहम्
११
अधा...
१२ ...शतक्रतो

५.३९.१ * * * मेहनास्ति * *

३ * * दिस्सु...

अभि व्रजं तत्निषे गव्यम् अज्यं वर्मीव धृष्णव् आ रुजा ॥ २ ॥
सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥
सम् ई वत्सं न मातृभिः सृजता गायसाधनम् ।
देवाव्यं मदम् अभि द्विशवसम् ॥ ४ ॥
पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
यथा मित्राय वरुणाय शंतमम् ॥ ५ ॥
प्र वाज्य् अक्षाः सहस्रधारस् तिरः पवित्रं वि वारम् अव्यम् ॥ ६ ॥
स वाज्य् अक्षाः सहस्ररेता अद्भिर् मृजानो गोभिः श्रीणानः ॥ ७ ॥
प्र सोम याहीन्द्रस्य कुक्षा नृभिर् येमाणो अद्रिभिः सुतः ॥ ८ ॥
ये सोमासः परावति ये अर्वावति सुन्विरे ।
ये वादः शर्यणावति ॥ ९ ॥
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
ये वा जनेषु पञ्चसु ॥ १० ॥
ते नो वृष्टिं दिवस् परि पवन्ताम् आ सुवीर्यम् ।
स्वाना देवास इन्दवः ॥ ११ ॥
आ ते वत्सो मनो यमत् परमाच् चित् सधस्थात् ।
अग्ने त्वां कामये गिरा ॥ १२ ॥
पुरुत्रा हि सदङ्ङ् असि दिशो विश्वा अनु प्रभुः ।
समत्सु त्वा हवामहे ॥ १३ ॥
समत्स्व् अग्निम् अवसे वाजयन्तो हवामहे ।
वाजेषु चित्रराधसम् ॥ १४ ॥
त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
आ वीरं पृतनासहम् ॥ १५ ॥
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अथा ते सुम्नम् ईमहे ॥ १६ ॥
त्वां शुष्मिन् पुरुहूत वाजयन्तम् उप ब्रुवे सहस्कृत ।
स नो रास्व सुवीर्यम् ॥ १७ ॥
यद् इन्द्र चित्र म इह नास्ति त्वादातम् अद्रिवः ।
राधस् तन् नो विदद्वस उभयाहस्त्य् आ भर ॥ १८ ॥
यत् ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
तेन दृढा चिद् अद्रिव आ वाजं दर्षि सातये ॥ १९ ॥

२
कौ ...दावनेः

यन् मन्यसे वरेण्यम् इन्द्र द्युक्षं तद् आ भर ।
विद्याम तस्य ते वयम् अकूपारस्य दावने ॥ २० ॥ ॥४०॥

३.४१

ऋ ९.९६.१७ ...वह्निं * *

शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
कविर् गीर्भिः काव्येन कविः सन् सोमः पवित्रम् अत्य् एति रेभन् ॥ १ ॥

१८ ...सहस्रणीथः * *

ऋषिमना य ऋषिकृत् स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन् सोमो विराजम् अनु राजति ष्टुप् ॥ २ ॥

१९

चमूषच् छ्येनः शकुनो विभृत्वा गोविन्दुर् द्रप्स आयुधानि बिभ्रत् ।
अपाम् ऊर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ३ ॥

९.८.१

एते सोमा अभि प्रियम् इन्द्रस्य कामम् अक्षरन् ।
वर्धन्तो अस्य वीर्यम् ॥ ४ ॥

२
* * धान्तु *

पुनानासश् चमूषदो गच्छन्तो वायुम् अश्विना ।
ते नो धत्त सुवीर्यम् ॥ ५ ॥

३
ऋतस्य * *

इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
देवानां योनिम् आसदम् ॥ ६ ॥

४

मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।
अनु विप्रा अमादिषुः ॥ ७ ॥

५

देवेभ्यस् त्वा मदाय कं सृजानम् अति मेष्यः ।
सं गोभिर् वासयामसि ॥ ८ ॥

६

पुनानः कलशेष्व् आ वस्त्राण्य् अरुषो हरिः ।
परि गव्यान्य् अव्यत ॥ ९ ॥

७

मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
इन्दो सखायम् आ विश ॥ १० ॥ ॥४१॥

३.४२

ऋ ९.८.९

नृचक्षसं त्वा वयम् इन्द्रपीतं स्वर्विदम् ।
भक्षीमहि प्रजाम् इषम् ॥ १ ॥

८

वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।
सहो नः सोम पृत्सु धाः ॥ २ ॥

९.१३.१

सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
वायोर् इन्द्रस्य निष्कृतम् ॥ ३ ॥

२

पवमानम् अवस्यवो विप्रम् अभि प्र गायत ।

सुष्वाणं देववीतये ॥ ४ ॥
३ पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
गृणाना देववीतये ॥ ५ ॥
४ उत नो वाजसातये पवस्व बृहतीर् इषः ।
द्युमद् इन्दो सुवीर्यम् ॥ ६ ॥
५ ते नः सहस्रिणं रयिं पवन्ताम् आ सुवीर्यम् ।
सुवाना * * स्वाना देवास इन्दवः ॥ ७ ॥
६ अत्या हियाना न हेतृभिर् असृग्रं वाजसातये ।
वि वारम् अव्यम् आशवः ॥ ८ ॥
७ ...धेनवः वाश्रा अर्षन्तीन्दवो ऽभि वत्सं न मातरः ।
दधन्विरे गभस्त्योः ॥ ९ ॥
८ जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत् ।
विश्वा अप द्विषो जहि ॥ १० ॥ ॥४२॥

३.४३

ऋ ९.१३.९ अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
योनाव् ऋतस्य सीदत ॥ १ ॥
९.१२.१ ...सादने सोमा असृग्रम् इन्दवः सुता ऋतस्य धारया ।
इन्द्राय मधुमत्तमाः ॥ २ ॥
२ ...मातरः अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
इन्द्रं सोमस्य पीतये ॥ ३ ॥
३ मदच्युत् क्षेति सादने सिन्धोर् ऊर्मा विपश्चित् ।
सोमो गौरी अधि श्रितः ॥ ४ ॥
४ * * * ऽभ्यो... दिवो नाभा विचक्षणो अव्या वारे महीयते ।
सोमो यः सुक्रतुः कविः ॥ ५ ॥
५ यः सोमः कलशेष्व् आ अन्तः पवित्र आहितः ।
तम् इन्दुः परि षस्वजे ॥ ६ ॥
६ प्र वाचम् इन्दुर् इष्यति समुद्रस्याधि विष्टपि ।
जिन्वन् कोशं मधुश्चुतम् ॥ ७ ॥
७ * * धीनाम् * सबर्दुघः नित्यस्तोत्रो वनस्पतिर् धेनाम् अन्तः सबर्दुघाम् ।
...युगा हिन्वानो मानुषा युजा ॥ ८ ॥
९ आ पवमान धारय रयिं सहस्रवर्चसम् ।
अस्मे इन्दो स्वाभुवम् ॥ ९ ॥
८ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥ को द्वितीयस्मिन् पादे विप्रः स * * अभि प्रिया दिवः कविर् विप्रस्य धारया सुतः ।
सोमो हिन्वे परावति ॥ १० ॥ ॥४३॥

३.४४

ऋ ९.५०.१ उत् ते शुष्मास ईरते सिन्धोर् ऊर्मेर् इव स्वनः ।

वाणस्य चोदया पविम् ॥ १ ॥
२ प्रसवे त उद् ईरते तिस्रो वाचो मखस्युवः ।
यद् अव्य एषि सानवि ॥ २ ॥
३ अव्यो वारे... अव्या वारैः परि प्रियं हरिं हिन्वन्त्य् अद्रिभिः ।
पवमानं मधुश्चुतम् ॥ ३ ॥
४ आ पवस्व मदिन्तम पवित्रं धारया कवे ।
अर्कस्य योनिम् आसदम् ॥ ४ ॥
५ स पवस्व मदिन्तम गोभिर् अञ्जानो अक्तुभिः ।
इन्दविन्द्राय पीतये एन्द्रस्य जठरं विश ॥ ५ ॥
९.६१.२२ स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
वव्रिवांसं महीर् अपः ॥ ६ ॥
२४ ...आसुरः त्वोतासस् तवावसा स्याम वन्वन्तः किकरः ।
सोम व्रतेषु जागृहि ॥ ७ ॥
२३ सुवीरासो वयं धना जयेम सोम मीढ्वः ।
पुनानो वर्ध नो गिरः ॥ ८ ॥
२५ अपघ्नन् पवते मृधो ऽप सोमो अराव्णः ।
गच्छन्न् इन्द्रस्य निष्कृतम् ॥ ९ ॥
२७ न त्वा शतं चन हुतो राधो दित्सन्तम् आ मिनन् ।
यत् पुनानो मखस्यसे ॥ १० ॥ ॥४४॥

३.४५

ऋ ९.६१.२६ महो नो राय आ भर पवमान जही मृधः ।
रास्वेन्दो वीरवद् यशः ॥ १ ॥
१ अया वीती परि स्रव यस् त इन्दो मदेष्व् आ ।
अवाहन् नवतीर् नव ॥ २ ॥
२ पुरः सद्य इत्थाधिये दिवोदासाय शंबरम् ।
अध त्यं तुर्वशं यदुम् ॥ ३ ॥
३ * णो .. परि नो अश्वम् अश्वविद् गोमद् इन्दो हिरण्यवत् ।
क्षरा सहस्रिणीर् इषः ॥ ४ ॥ ॥४५॥

३.४६

ऋ ८.४३.१४ त्वं ह्य् अग्ने अग्निना विप्रो विप्रेण सन् सता ।
सखा सख्या समिध्यसे ॥ १ ॥
१५ स त्वं विप्राय दाशुषे * * * त्वं सुन्वते यजमानाय रयिं देहि सहस्रिणम् ।
अग्ने वीरवतीम् इषम् ॥ २ ॥
१६ ...मे अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत ।
इमं स्तोमं जुषस्व नः ॥ ३ ॥

७.३.१ अग्निं वो देवम् अग्निभिः सजोषा यजिष्ठं दूतम् अध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर् ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ ४ ॥

२ प्रोथद् अश्वो न यवसे ऽविष्यन् यदा महः संवरणाद् व्य् अस्थात् ।
आद् अस्य वातो अनु वाति शोचिर् अध स्म ते व्रजनं कृष्णम् अस्ति ॥ ५ ॥

३ उद् यस्य ते नवजातस्य वृष्णो ऽग्ने चरन्त्य् अजरा इधानाः ।
* * * * एति... अच्छा द्याम् अरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥ ६ ॥

७.६६.४ यद् अद्य सूर उदिते अनागा मित्रो अर्यमा ।
सुवाति सविता भगः ॥ ७ ॥

५ सुप्रावीर् अस्तु स क्षयः प्र नु यामन् सुदानवः ।
यो नो अंहो ऽतिपिप्रति ॥ ८ ॥

६ उत स्वराजो अदितिर् अदब्धस्य व्रतस्य ये ।
महो राजान ईशते ॥ ९ ॥

८.९३.७ तम् इन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥ १० ॥

८...मदे * इन्द्रः स दामने कृत ओजिष्ठः स बले हितः ।
द्युम्नी श्लोकी स सोम्यः ॥ ११ ॥

९ गिरा वज्रो न संभृतः सबलो अनपच्युतः ।
* ऋष्वो * ववक्ष उग्रो अस्तृतः ॥ १२ ॥ ॥४६॥

३.४७

* ९.५१.१ ...सृज पुनीहीन्द्राय * अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय ।
पुनाहीन्द्राय पातवे ॥ १ ॥

३ ...अश्नते तव त्य इन्दो अन्धसो देवा मधोर् व्य् आशत ।
पवमानस्य मरुतः ॥ २ ॥

२ दिवः पीयूषम् उत्तमं सोमम् इन्द्राय वज्रिणे ।
सुनोता मधुमत्तमम् ॥ ३ ॥

९.७६.१ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानाम् अनुमाद्यो नृभिः ।
...कृणुते हरिः सृजानो अत्यो न सत्वभिर् वृथा पाजांसि कृणुषे नदीष्व् आ ॥ ४ ॥

२ शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन् रथिरो गविष्टिषु ।

इन्द्रस्य शुष्मम् ईरयन्न् अपस्युभिर् इन्दुर् हिन्वानो अज्यते मनीषिभिः ॥ ५ ॥

३ इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्व् आ विश ।

कौ * नः...न * * कौ माहि * ८.४.१ प्र णः पिन्व विद्युद् अभ्रेव रोदसी धिया नो वाजं उप मासि शश्वतः ॥ ६ ॥

यद् इन्द्र प्राग् अपाग् उदङ् न्यग् वा हूयसे नृभिः । सिमा पुरू नृषूतो अस्य् आनवे ऽसि प्रशर्ध तुर्वशे ॥ ७ ॥

२ * * ब्रह्मभिः स्तोमवाहस... ८.६१.१ * मघवा... २ ...ओजसे * * यद् वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा । कण्वासस् त्वा स्तोमेभिर् ब्रह्मवाहस इन्द्रा यच्छन्त्य् आ गहि ॥ ८ ॥

उभयं शृणवच् च न इन्द्रो अर्वाग् इदं वचः । सत्राच्या मघवान् सोमपीतये धिया शविष्ठ आ गमत् ॥ ९ ॥

तं हि स्वराजं वृषभं तम् ओजसा धिषणे निष्टतक्षतुः । उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ १० ॥ ॥४७॥

३.४८

ऋ ९.६३.२२ * देवायुषग्... २३ प्रियः... २४ ९.९८.१ अभि...पुरुस्पृहम् ...विश्वासहम् ३ * ष्य सुवानो अक्षा... * * * * * नैति * ५ * * * वृत्रहन्वसो वस्वः * * * * * सुन्वस्याधिगो ९.१०९.४ ५ ...प्रजायै ६ पवस्व देव आयुषग् इन्द्रं गच्छतु ते मदः । वायुम् आ रोह धर्मणा ॥ १ ॥

पवमान नि तोशसे रयिं सोम श्रवाय्यम् । इन्दो समुद्रम् आ विश ॥ २ ॥

अपघ्नन् पवसे मृधः ऋतुवित् सोम मत्सरः । नुदस्वादेवयुं जनम् ॥ ३ ॥

अभी नो वाजसातमं रयिम् अर्ष शतस्पृहम् । इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ४ ॥

परि स्य स्वानो अक्षरद् इन्दुर् अव्ये मदच्युतः । धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥ ५ ॥

वयं ते अस्य राधसो वसोर् वसो पुरुस्पृहः । नि नेदिष्ठतमा इषः स्याम सुम्ने ते अधिगो ॥ ६ ॥

पवस्व सोम महान् समुद्रः पिता देवानां विश्वाभि धाम ॥ ७ ॥

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥ ८ ॥

दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन् वाजी पवस्व ॥ ९ ॥

८.८४.१
अग्निं...
२ * * प्रचेतसं * * अध *
३ ...शृणुधी *
८.९८.४ ...प्रियः * अगोह्यः
* * विश्वतस्...
५
६ ...दर्ता * *
१.११.४
५
* देवा (एवं की)...
६

प्रेष्ठं वो अतिथिं स्तुषे मित्रम् इव प्रियम् ।
अग्ने रथं न वेद्यम् ॥ १० ॥
कविम् इव प्रशंस्यं यं देवास इति द्विता ।
नि मर्त्येष्व् आदधुः ॥ ११ ॥
त्वं यविष्ठ दाशुषो नॄंः पाहि शृणुही गिरः ।
रक्षा तोकम् उत त्मना ॥ १२ ॥
एन्द्र नो गधि प्रिय सत्राजिद् अगोह्य ।
गिरिर् न विश्वतः पृथुः पतिर् दिवः ॥ १३ ॥
अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
इन्द्रासि सुन्वतो वृधः पतिर् दिवः ॥ १४ ॥
त्वं हि शश्वतीनाम् इन्द्र धर्ता पुराम् असि ।
हन्ता दस्योर् मनोर् वृधः पतिर् दिवः ॥ १५ ॥
पुरां भिन्दुर् युवा कविर् अमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ १६ ॥
त्वं बलस्य गोमतो ऽपावर् अद्रिवो बिलम् ।
त्वां देवासो अभिभ्युषस् तुज्यमानास आविषुः ॥ १७ ॥
तवाहं शूर रातिभिः प्रत्य् आयं सिन्धुम् आवदन् ।
उपातिष्ठन्त गिर्वणो विदुष् टे तस्य कारवः ॥ १८ ॥ ॥४८॥

३.४९

ऋ ९.९७.४०
राजा
...सुवान
इन्दुः
४१

४२ * * * * च * * *

९.३.१ ...दीयति
२
३

अक्रान् समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे स्वानो अद्रिः ॥ १ ॥
महत् तत् सोमो महिषश् चकारापां यद् गर्भो ऽवृणीत देवान् ।
अदधाद् इन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिर् इन्दुः ॥ २ ॥
मत्सि वायुम् इष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः ।
मत्सि शर्धो मारुतं मत्सि देवान् मत्सि द्यावापृथिवी देव सोम ॥ ३ ॥
एष देवो अमर्त्यः पर्णवीर् इव दीयते ।
अभि द्रोणान्य् आसदम् ॥ ४ ॥
एष देवो विपा कृतो अति ह्वरांसि धावति ।
पवमानो अदाभ्यः ॥ ५ ॥
एष देवो विपन्युभिः पवमान ऋतायुभिः ।
हरिर् वाजाय मृज्यते ॥ ६ ॥

४ एष विश्वानि वार्या शूरो यन्न् इव सत्वभिः ।
पवमानः सिषासति ॥ ७ ॥

५ ...दशस्यति एष देवो रथर्यति पवमानो दिशस्यति ।
आविष् कृणोति वग्वनुम् ॥ ८ ॥

६ एष विप्रैर् अभिष्टुतो ऽपो देवो वि गाहते ।
दधद् रत्नानि दाशुषे ॥ ९ ॥

७ एष दिवं वि धावति तिरो रजांसि धारया ।
पवमानः कनिक्रदत् ॥ १० ॥ ॥४९॥

३.५०

ऋ ९.३.८ एष दिवं व्य् आसरत् तिरो रजांस्य् अस्तृतः ।
पवमानः स्वध्वरः ॥ १ ॥

९ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
हरिः पवित्रे अर्षति ॥ २ ॥

१० एष उ स्य पुरुव्रतो जज्ञानो जनयन्न् इषः ।
धारया पवते सुतः ॥ ३ ॥

९.१५.१ एष धिया यात्य् अण्व्या शूरो रथेभिर् आशुभिः ।
गच्छन्न् इन्द्रस्य निष्कृतम् ॥ ४ ॥

२ एष पुरू धियायते बृहते देवतातये ।
* आसते यत्रामृतास आशत ॥ ५ ॥

३ ...शुभ्रावता * एष हितो वि नीयते ऽन्तः शुन्ध्यावता पथा ।
यदी तुञ्जन्ति भूर्णयः ॥ ६ ॥

५ एष रुक्मिभिर् ईयते वाजी शुभ्रेभिर् अंशुभिः ।
पतिः सिन्धूनां भवन् ॥ ७ ॥

४ एष शृङ्गाणि दोधुवच् छिशीते यूथ्यो वृषा ।
नृम्णा दधान ओजसा ॥ ८ ॥

६ * * पिब्दना... एष वसूनि पिब्दनः परुषा ययिवं अति ।
अव शादेषु गच्छति ॥ ९ ॥

७ एतं मृजन्ति मर्ज्यम् उप द्रोणेष्व् आयवः ।
प्रचक्राणं महीर् इषः ॥ १० ॥ ॥५०॥

३.५१

ऋ ९.१५.८ * * * * * मृजन्ति सप्त [धीतयः एतम् उ त्यं दश क्षिपो हरिं हिन्वन्ति यातवे ।
स्वायुधं मदिन्तमम् ॥ १ ॥

९.२७.१ ...स्त्रिधः एष कविर् अभिष्टुतः पवित्रे अधि तोशते ।
पुनानो घ्नन्न् अप द्विषः ॥ २ ॥

२ एष इन्द्राय वायवे स्वर्जित् परि षिच्यते ।

पवित्रे दक्षसाधनः ॥ ३ ॥
३ एष नृभिर् वि नीयते दिवो मूर्धा वृषा सुतः ।
सोमो वनेषु विश्ववित् ॥ ४ ॥
४ एष गव्युर् अचिक्रदत् पवमानो हिरण्ययुः ।
इन्दुः सत्राजिद् अस्तृतः ॥ ५ ॥
९.२८.६ * * * सोमः पुनानो [अर्षति (एवं कौ) एष शुष्म्य् अदाभ्यः सोमो वाजम् इवासरत् ।
९.२७.६ देवावीर् अघशंसहा ॥ ६ ॥
एष शुष्म्य् असिष्यदद् अन्तरिक्षे वृषा हरिः ।
पुनान इन्दुर् इन्द्रम् आ ॥ ७ ॥
९.२८.१ ...विश्ववित् (एवं कौ) * * अव्यो... एष वाजी हितो नृभिर् विश्वाविन् मनसस् पतिः ।
२ अव्यं वारं वि धावति ॥ ८ ॥
* धामान्यू (एवं कौ) * एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः ।
३ विश्वा वसून्य् आविशन् ॥ ९ ॥
एष देवः शुभायते ऽधि योनाव् अमर्त्यः ।
वृत्रहा देववीतमः ॥ १० ॥ ॥५१॥

३.५२

* ९.२८.४ एष वृषा कनिक्रदद् दशभिर् जामिभिर् यतः ।
अभि द्रोणानि धावति ॥ १ ॥
९.२७.५ कौ एष सूर्यमरोचयत् * * * एष सूर्येण हासते पवमानो अधि द्यवि ।
पवित्रे मत्सरो मदः ॥ २ ॥
९.२८.५ एष सूर्यम् अरोचयत् पवमानो विचर्षणिः ।
* धामानि * विश्वा वसूनि विश्ववित् ॥ ३ ॥
९.३८.१ ...ऽव्यो * * एष उ स्य वृषा रथो ऽव्या वारेभिर् अर्षति ।
गच्छन् वाजं सहस्रिणम् ॥ ४ ॥
२ एतं त्रितस्य योषणो हरिं हिन्वन्त्य् अद्रिभिः ।
इन्दुम् इन्द्राय पीतये ॥ ५ ॥
३ एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ।
याभिर् मदाय शुम्भते ॥ ६ ॥
४ एष स्य मानुषीष्व् आ श्येनो न विक्षु सीदति ।
गच्छन् जारो न योषितम् ॥ ७ ॥
६ एष स्य पीतये सुतो हरिर् अर्षति धर्णसिः ।
क्रन्दन् योनिम् अभि प्रियम् ॥ ८ ॥
५ एष स्य मधो रसो ऽव चष्टे दिवः शिशुः ।
य इन्दुर् वारम् आविशत् ॥ ९ ॥
९.३७.१ स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।
विघ्नन् रक्षांसि देवयुः ॥ १० ॥ ॥५२॥

३.५३

ऋ ९.३७.२ स पवित्रे विचक्षणो हरिर् अर्षति धर्णसिः ।
अभि योनिं कनिक्रदत् ॥ १ ॥

३ * * रोचना...
स वाजी रोचनं दिवः पवमानो वि धावति ।
रक्षोहा वारम् अव्ययम् ॥ २ ॥

४ स त्रितस्याधि सानवि पवमानो अरोचयत् ।
जामिभिः सूर्यं सह ॥ ३ ॥

५ स वृत्रहा वृषा सुतो वरिवोविद् अदाभ्यः ।
सोमो वाजम् इवासरत् ॥ ४ ॥

६ स देवः कविनेषितो ऽभि द्रोणानि धावति ।
* * मंहना
इन्दुर् इन्द्राय मंहयन् ॥ ५ ॥

९.६६.१० पवमानस्य ते कवे वाजिन् सर्गा असृक्षत ।
अर्वन्तो न श्रवस्यवः ॥ ६ ॥

११ अच्छा कोशं मधुश्चुतम् असृग्रं वारे अव्यये ।
अवावशन्त धीतयः ॥ ७ ॥

१२ अच्छा समुद्रम् इन्दवो ऽस्तं गावो न धेनवः ।
अग्मन्न् ऋतस्य योनिम् आ ॥ ८ ॥ ॥५३॥

३.५४

ऋ ६.१६.३७ उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत ।
अग्ने ससृज्महे गिरः ॥ १ ॥

३८ उप छायाम् इव घृणेर् अगन्म शर्म ते वयम् ।
अग्ने हिरण्यसंदृशः ॥ २ ॥

३९ य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः ।
अग्ने पुरो रुरोजिथ ॥ ३ ॥

७.१२.१ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तर् ऊर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ ४ ॥

२ स मह्ना विश्वा दुरितानि साह्वान् अग्निः ष्टवे दम आ जातवेदाः ।
स नो रक्षिषद् दुरितात् अवद्याद् अस्मान् गृणत उत नो मघोनः ॥ ५ ॥

३ त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर् वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

७.६६.१ प्र मित्रयोर् वरुणयोः स्तोमो न एतु शूष्यः ।

नमस्वान् तुविजातयोः ॥ ७ ॥
२ या धारयन्त देवाः सुदक्षा दक्षपितरा ।
असुर्याय प्रमहसा ॥ ८ ॥
३ ता नः स्तिपा तनूपा वरुणा जरितॄणाम् ।
मित्र साधयतं धियः ॥ ९ ॥
८.६.१ महं इन्द्रो य ओजसा पर्जन्यो वृष्टिमं इव ।
स्तोमैर् वत्सस्य वावृधे ॥ १० ॥
३ कण्वा इन्द्रं यद् अक्रत स्तोमैर् यज्ञस्य साधनम् ।
* * आयुधम् जामि ब्रुवत आयुधा ॥ ११ ॥
२ प्रजाम् ऋतस्य पिप्रतः प्र यद् भरन्त बह्वयः ।
विप्रा ऋतस्य वाहसा ॥ १२ ॥ ॥५४॥

३.५५

ऋ ९.६६.२५ * जंन्नतो... पवमानस्य जिघ्नतो हरेश् चन्द्रा असृक्षत ।
जीरा अजिरशोचिषः ॥ १ ॥
२६ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
हरिश्चन्द्रो मरुद्गणः ॥ २ ॥
२७ पवमानो * अज्ञवद्... पवमान व्य् अश्नुहि रश्मिभिर् वाजसातमः ।
दधत् स्तोत्रे सुवीर्यम् ॥ ३ ॥
९.१०७.१ परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वां यो नर्यो अप्स्व् अन्तर् आ सुषाव सोमम् अद्रिभिः
॥ ४ ॥
२ नूनं पुनानो ऽविभिः परि स्रवाद्‌ब्धः सुरभिंतरः ।
सुते चित् त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिर् उत्तरम् ॥ ५ ॥
३ * सुवानश्... परि स्वानश् चक्षसे देवमादनः क्रतुर् इन्दुर् विचक्षणः ॥ ६ ॥
९.८२.१ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
* * पर्येत्य् * * * * पुनानो वारम् अत्य् एष्य् अव्ययं श्येनो न योनिं
* आसदम् घृतवन्तम् आसदत् ॥ ७ ॥
३ पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
* * * * उतासरन् * * नसते स्वसार आपो अभि गा उद् आसरन् सं ग्रावभिर् वसते वीते अध्वरे ॥ ८ ॥
२ ...सृष्टो (एवं कौ) * कविर् वेधस्या पर्य् एषि माहिनम् अत्यो न निक्तो अभि
[* * * वाजम् अर्षसि ।
अपसेधन् * * मृडय (नो नास्ति) घृतं अपसेधं दुरिता सोम नो मृड घृता वसानः परि यासि

निर्णिजम् ॥ ९ ॥

८.९९.३ श्रायन्त इव सूर्यं विश्वेद् इन्द्रस्य भक्षत ।
* जाते जनमान ... दीधिम वसूनि जातो जनिमान्य् ओजसा प्रति भागं न दीधिमः ॥ १० ॥

४ अनर्षरातिं ... अलर्षिरातिं वसुदाम् उप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो... यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ ११ ॥

८.६१.१३ यत इन्द्र भयामहे ततो नो अभयं कृधि ।
* * * * * ऊतिभिर् ... मघवन् शग्धि तव तन् न ऊतये वि द्विषो वि मृधो जहि ॥ १२ ॥

१४ * * राधस्पते ... विधतः त्वं हि राधसस् पते राधसो महः क्षयस्यासि विधर्ता ।
तं त्वा वयं मघवन्न् इन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १३ ॥ ॥५५॥

३.५६

क ९.६७.१ त्वं सोमासि धारयुर् मन्द्र ओजिष्ठो अध्वरे ।
पवस्व मंहयद्रयिः ॥ १ ॥

२ * * नृमादनो ... त्वं सुतो मदिन्तमो दधन्वान् मत्सरिन्तमः ।
इन्द्राय सूरिरन्धसा इन्दुः सत्राजिद् अस्तृतः ॥ २ ॥

३ त्वं सुष्वाणो अद्रिभिर् अभ्य् अर्ष कनिक्रदत् ।
* * उत्तमम् द्युमन्तं शुष्मम् आ भर ॥ ३ ॥

९.१०६.७ पवस्व देववीतय इन्दो धाराभिर् ओजसा ।
आ कलशं मधुमान् सोम नः सदः ॥ ४ ॥

८ तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।
त्वां देवासो अमृताय कं पपुः ॥ ५ ॥

९ आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ६ ॥

९.९८.७ परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान् विश्वं इत् परि मदेन सह गच्छति ॥ ७ ॥

६ ... स्वसारो * द्विर् यं पञ्च स्वयशसं सखायो अद्रिसंहतम् ।
* * * प्रस्नापयन्त्यूर्मिणम् प्रियम् इन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ ८ ॥

१० इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
* * * देवाय * नरे च दक्षिणावते वीराय सदनासदे ॥ ९ ॥

९.१०९.१० * * क्रत्वे ... पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १० ॥

१२ शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥ ११ ॥

११ तं...
प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥१२॥

९.६१.१३
उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषुः ॥ १३ ॥

१५ * णः...
अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीम् इषम् ।

...उक्थम्
वर्धा समुद्रम् उक्थ्य ॥ १४ ॥

१४
तम् इद् वर्धन्तु नो गिरो वत्सं संशिश्वरीर् इव ।
य इन्द्रस्य हृदंसनिः ॥ १५ ॥

८.१९.१९
भद्रो नो अग्निर् आहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥ १६ ॥

२० ...सासहः
भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।

...अभिष्टिभिः
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ १७ ॥

१.८४.७
य एक इद् विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ १८ ॥

९
यश् चिद् धि त्वा बहुभ्य आ सुतावं आविवासति ।
उग्रं तत् पत्यते शव इन्द्रो अङ्ग ॥ १९ ॥

८
कदा मर्तम् अराधसं पदा क्षुम्पम् इव स्फुरत् ।
कदा नः शुश्रवद् गिर इन्द्रो अङ्ग ॥ २० ॥

१.१०.१
गायन्ति त्वा गायत्रिणो ऽर्चन्त्य् अर्कम् अर्किणः ।
ब्रह्माणस् त्वा शतक्रत उद् वंशम् इव येमिरे ॥ २१ ॥

२ * * सानुमारुहद्...
यत् सानोः सान्व् आरुहो भूर्य् अस्पष्ट कर्त्वम् ।
तद् इन्द्रो अर्थं चेतति यूथेन वृष्णिर् एजति ॥ २२ ॥

३ कौ युङ्क्ष्वा...
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिराम् उपश्रुतिं चर ॥ २३ ॥ ॥५६॥

३.५७

क १.१३.१ सुसमिद्धो...
सुषमिद्धो न आ वह देवं अग्ने हविष्मते ।
होतः पावक यक्षि च ॥ १ ॥

२
मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे ।

कौ * * ऋतवे
अद्या कृणुहि वीतये ॥ २ ॥

३
नराशंसम् इह प्रियम् अस्मिन् यज्ञ उप ह्वये ।
मधुजिह्वं हविष्कृतम् ॥ ३ ॥

४
अग्ने सुखतमे रथे देवं ईडित आ वह ।
असि होता मनुर्हितः ॥ ४ ॥

५.६८.३
ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
महि वां क्षत्रं देवेषु ॥ ५ ॥

४
ऋतम् ऋतेन सपन्तेषिरं दक्षम् आशाते ।
अद्रुहा देवौ वर्धेते ॥ ६ ॥

५ वृष्टिद्यावा रीत्यापेषस् पती दानुमत्याः ।
बृहन्तं गर्तम् आशाते ॥ ७ ॥

१.६.१ युञ्जन्ति ब्रध्नम् अरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना दिवि ॥ ८ ॥

२ युञ्जन्त्य् अस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥ ९ ॥

३ केतुं कृण्वन्न् अकेतवे पेशो मर्या अपेशसे ।
सम् उषद्भिर् अजायथाः ॥ १० ॥

६.६०.१० तम् ईडिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।
कृष्णा कृणोति जिह्वया ॥ ११ ॥

११ य इद्ध आविवासति सुम्नम् इन्द्रस्य मर्त्यः ।
द्युम्नाय सुतरा अपः ॥ १२ ॥

१२ ता नो वाजवतीर् इष आशून् पिपृतम् अर्वतः ।
इन्द्रम्... एन्द्रम् अग्निं च वोढवे ॥ १३ ॥ ॥५७॥

३.५८

* ९.११०.८ दिवः... प्रत्नं पीयूषं पूर्व्यं यद् उक्थ्यं महो गाहाद् दिव आ निर् अधुक्षत ।
इन्द्रम् अभि जायमानं सम् अस्वरन् ॥ १ ॥

९ ...भुवनाभि अध यद् इमे पवमान रोदसी इमा च विश्वा भुवनानि मज्मना ।

* * निःष्ठा... । कौ ... राजसि यूथे न निष्ठा वृषभो वि तिष्ठसे ॥ २ ॥

६ आद् ईं के चित् पश्यमानास आप्यं वसुरुचो दिव्या अभ्य् अनूषत ।

कौ दिवो न वारं * * * वारं न देवः सविता व्य् ऊर्णुते ॥ ३ ॥

९.९७.३७ * * * ऋता... आ जागृविर् विप्र ऋतं मतीनां सोमः पुनानो असदच् चमूषु ।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ ४ ॥

३८ * * * * न धातोभे * * वि * * स पुनान उप सूरे दधान ओभे अप्रा रोदसी वी ष आवः ।

* * * * * स तू * * * * प्रिया चिद् यस्य प्रियसास ऊती सतो धनं कारिणे न प्र यंसत् ॥ ५ ॥

३९ स वर्धिता वर्धनः पूयमानः सोमो मीढ्वं अभि नो ज्योतिषावीत् ।

येना... उष्णन् (कौ इष्णन्) यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिम् ईषुः ॥ ६ ॥

८.१.१ मा चिद् अन्यद् वि शंसत सखायो मा रिषण्यत ।

इन्द्रम् इत् स्तोता वृषणं सचा सुते मुहुर् उक्था च शंसत ॥ ७ ॥

२ * * यथाजुरं... अवक्रक्षिणं वृषभं यथाजुवं गां न चर्षणीसहम् ।

* संवननोभयंकरं... विद्वेषणं संवननम् उभयंकरं मंहिष्ठम् उभयाविनम् ॥ ८ ॥

८.३.१५ उद् उ त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ ९ ॥

१६ ...आनशुः कण्वा इव भृगवः सूर्या इव विश्वम् इद् धीतम् आशत ।
इन्द्रं स्तोमेभिर् महयन्त आयवः प्रियमेधासो अस्वरन् ॥ १० ॥ ॥५८॥

३.५९

क ९.१०८.१ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥ १ ॥

२ ...पीता * यस्य ते पीत्वा वृषभो वृषायते ऽस्य पीत्वा स्वर्विदः ।

...ऽच्छा (एवं का) * * स सुप्रकेतो अभ्य् अक्रमीद् इषो ऽच्छ वाजं नैतशः ॥ २ ॥

९.१०६.१ इन्द्रम अच्छ सुता इमे वृषणं यन्तु हरयः ।

श्रुष्टी... श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ३ ॥

२ अयं भगाय सानसिर् इन्द्राय पवते सुतः ।
सोमो जैत्रस्य चेतति यथा विदे ॥ ४ ॥

३ ...गृभ्णीत * अस्येद् इन्द्रो मदेष्व् आ ग्राभं गृभ्णानि सानसिम् ।

* * वृषणं * समप्सुजित् (एवं का) वज्रं च वृषभं भरत् ॥ ५ ॥

९.११०.१ पर्य् ऊ षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।

...ईयसे द्विषस् तरध्या ऋणया न ईरसे ॥ ६ ॥

३ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
गोजीरया रंहमाणः पुरन्ध्या ॥ ७ ॥

२ अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजं अभि पवमान प्र गाहसे ॥ ८ ॥

९.१०९.१ परि प्र धन्वेन्द्राय सोम स्वादुर् मित्राय पूष्णे भगाय ॥९॥

३ एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ १० ॥

२ * * * * पेयाः... इन्द्रस् ते सोम सुतस्य पेयात् क्रत्वे दक्षाय विश्वे च देवाः ॥ ११ ॥

९.६९.६ ...प्रसुपः * सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकम् ईरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्राद् ऋते पवते धाम किं चन ॥ १२ ॥

२ उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तर् आसनि ।

* * प्रप्रताम्...	पवमानः संतनिः सुन्वताम् इव मधुमान् द्रप्सः परि वारम् अर्षति ॥ १३ ॥
४ * मिमाति...	उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीर् उप यन्ति निष्कृतम् ।
	अत्य् अक्रमीद् अर्जुनं वारम् अव्ययम् अत्कं न निक्तं परि सोमो अव्यत ॥ १४ ॥
७.१.१ ...हस्तच्युती जनयन्त	अग्निं नरो दीधितिभिर् अरण्योर् हस्तच्युतं जनयत प्रशस्तम् ।
...अथर्युम्	दूरेदृशं गृहपतिम् अथव्युम् ॥ १५ ॥
३	प्रेद्धो अग्ने दीदिहि पुरो नो ऽजस्रया सूर्म्या यविष्ठ ।
	त्वां शश्वन्त उप यन्ति वाजाः ॥ १६ ॥
२	तम् अग्निम् अस्ते वसवो न्य् ऋण्वन् सुप्रतिचक्षम् अवसे कुतश् चित् ।
	दक्षाय्यो यो दम आस नित्यः ॥ १७ ॥
१०.१८९.१	आयं गौः पृश्निर् अक्रमीद् असदन् मातरं पुरः ।
	पितरं च प्रयन् स्वः ॥ १८ ॥
२	अन्तश् चरति रोचनास्य प्राणाद् अपानती ।
	व्य् अख्यन् महिषो दिवम् ॥ १९ ॥
३	त्रिंशद् धाम वि राजति वाक् पतङ्गाय धीयते ।
	प्रति वस्तोर् अह द्युभिः ॥ २० ॥ ॥५९॥

ऋ ९.१११.१ ...स्वयुग्वभिः * * स्वयुग्वभिः

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।

* सुतस्य ...

धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।

* * * परियात्य् ...

विश्वा यद् रूपा परियास्य् ऋक्वभिः सप्तास्येभिर् ऋक्वभिः ॥ १ ॥

३ पूर्वाम् ...

प्राचीम् अनु प्रदिशं याति चेकितत् सं रश्मिभिर् यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
अगमन् उक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।
वज्रश् च यद् भवथो अनपच्युता समत्स्व् अनपच्युता ॥ २ ॥

२ त्वं त्यत् (ह नास्ति)...

त्वं ह त्यत् पणीनां विदो वसु सं मातृभिर् मर्जयसि स्व आ दम ऋतस्य धीतिभिर् दमे ।
परावतो न साम तद् यत्रा रणन्ति धीतयः ।
त्रिधातुभिर् अरुषीभिर् वयो दधे रोचमानो वयो दधे ॥ ३ ॥

१०.१३३.१

प्रोष्व् अस्मै पुरोरथम् इन्द्राय शूषम् अर्चत ।
अभीके चिद् उ लोककृत् सङ्गे समत्सु वृत्रहा ।
अस्माकं बोधि चोदिता नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥ ४ ॥

२

त्वं सिन्धूर् अवासृजो ऽधराचो अहन्न् अहिम् ।
अशत्रुर् इन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।
तं त्वा परि ष्वजामहे नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥ ५ ॥

३

वि षु विश्वा अरातयो ऽर्यो नशन्त नो धियः ।
अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति ।
या ते रात्रिर् ददिर् वसु नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥ ६ ॥

३.२७.१

प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।
देवान् जिगाति सुम्नयुः ॥ ७ ॥

२ ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् ।
श्रुष्टीवानं धितावानम् ॥ ८ ॥
३ अग्ने शकेम ते वयं यमं देवस्य वाजिनः ।
अति द्वेषांसि तरेम ॥ ९ ॥
१.५०.१ उद् उ त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ १० ॥ ॥१॥

४.२

* १.५०.४ तरणिर् विश्वदर्शतो ज्योतिष्कृद् असि सूर्य ।
विश्वम् आ भासि रोचनम् ॥ १ ॥
५ प्रत्यङ् देवानां विशः प्रत्यङ्ङ् उद् एषि मानुषान् ।
प्रत्यङ् विश्वं स्वर् दृशे ॥ २ ॥
८.९३.१ उद् घेद् अभि श्रुतामघं वृषभं नर्याप्सम् ।
अस्तारम् एषि सूर्य ॥ ३ ॥
२ नव यो नवतिं पुरो बिभेद बाह्वोजसा ।
अहिं च वृत्रहावधीत् ॥ ४ ॥
३ स न इन्द्रः शिवः सखाश्ववद् गोमद् यवमत् ।
उरुधारेव दोहते ॥ ५ ॥
३.१२.६ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
तद् वां चेति प्र वीर्यम् ॥ ६ ॥
८ इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।
युवोर् अप्तूर्यं हितम् ॥ ७ ॥
७ इन्द्राग्नी अपसस् पर्यु उप प्र यन्ति धीतयः ।
ऋतस्य पथ्या अनु ॥ ८ ॥
१०.१७०.१ विभ्राड् बृहत् पिबतु सोम्यं मध्व् आयुर् दधद् यज्ञपतावु
अविंहुतम् ।
...पुपोष पुरुधा * वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि
राजति ॥ ९ ॥
२ विभ्राड् बृहत् सुभृतं वाजसातमं धर्मन् दिवो धरुणे सत्यम्
अर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर् जज्ञे असुरहा सप-
त्नहा ॥ १० ॥ ॥२॥

४.३

* १०.१७०.३ इदं श्रेष्ठं ज्योतिषां ज्योतिर् उत्तमं विश्वजिद् धनजिद्
उच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो
अच्युतम् ॥ १ ॥

८.१०१.११ वण् महं असि सूर्य बड् आदित्य महं असि ।
* * * * पनस्यते ऽद्धा * * * महस् ते सतो महिमा पनिष्टम मह्ना देव महं असि ॥ २ ॥
१२ बट् सूर्य श्रवसा महं असि सत्रा देव महं असि ।
मह्ना देवानाम् असुर्यः पुरोहितो विभु ज्योतिर् अदाभ्यम् ॥ ३ ॥
८.१०२.१३ उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः ।
वायोर् अनीके अस्थिरन् ॥ ४ ॥
७.९६.५ * * सरस्व... ये ते सरस्वन् ऊर्मयो मधुमन्तो घृतश्चुतः ।
तेभिर् नो ऽविता भव ॥ ५ ॥
६.६१.१० उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।
सरस्वती स्तोम्या भूत् ॥ ६ ॥
१.१८.१ सोमानं... सोमानां स्वरणं कृणुहि ब्रह्मणस् पते ।
कक्षीवन्तं य औशिजः ॥ ७ ॥
३.६२.१० तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ ८ ॥
९.६६.१९ अग्न आयूंषि पवस आ सुवोर्जम् इषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ ९ ॥
२१ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
* रयिं मयि पोषम् (एवं कौ) दधत् पोषं रयिं मयि ॥ १० ॥ ॥३॥

४.४

* ९.६६.२० अग्निर् ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तम् ईमहे महागयम् ॥ १ ॥
९.८८.१ अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वम् अस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ २ ॥
२ स ईं रथो न भूरिषाळ् अयोजि महः पुरूणि सातये वसूनि ।
आद् ईं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥ ३ ॥
७ शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
कौ ...पृतनाषाड् न आपो न मक्षू सुमतिर् भवा नः सहस्रापाः पृतनाषाण् न यज्ञः ॥ ४ ॥
६.१६.१ त्वम् अग्ने यज्ञानां होता विश्वेषां हितः ।
देवेभिर् मानुषे जने ॥ ५ ॥
२ स नो मन्द्राभिर् अध्वरे जिह्वाभिर् यजा महः ।
आ देवान् वक्षि यक्षि च ॥ ६ ॥

३ बेत्था हि वेधो अध्वनः पथश् च देवाञ्जसा ।
अग्ने यज्ञेषु सुक्रतो ॥ ७ ॥

९.१.८ तम् ईं हिन्वन्त्य् अग्रुवो धमन्ति बाकुरं दृतिम् ।
* वारणं * त्रिधातु सारघ मधु ॥ ८ ॥

९ अभीमम् अघ्न्या उत श्रीणन्ति धेनवः शिशुम् ।
सोमम् इन्द्राय पातवे ॥ ९ ॥

१० अस्येद् इन्द्रो मदेष्व् आ विश्वा वृत्राणि जिघ्नते ।
शूरो मघा च मंहते ॥ १० ॥ ॥४॥

४.५

* ८.१६.८ स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः ।
...अभिभूतिः एकश् चित् सन्न् अविभूतिः ॥ १ ॥

९ तम् अर्केभिस् तं सामभिस् तं गायत्रैश् चर्षणयः ।
इन्द्रं वर्धन्ति क्षितयः ॥ २ ॥

१० प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु ।
सासह्वांसं युधामित्रान् ॥ ३ ॥

११ स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः ।
इन्द्रो विश्वा अति द्विषः ॥ ४ ॥

१०.१२०.१ तद् इद् आस भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस् त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रून् अनु यं विश्वे मदन्त्य् ऊमाः ॥ ५ ॥

२ बावृधानः शवसा भूर्योजाः शत्रुर् दासाय भियसं दधाति ।
अव्यनच् च व्यनच् च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ ६ ॥

३ त्वे क्रतुम् अपि वृञ्जन्ति विश्वे द्विर् यद् एते त्रिर् भवन्त्य् ऊमाः ।
स्वादोः स्वादीयः स्वादुना सृजा सम् अदः सु मधु मधुनाभि योधीः ॥ ७ ॥ ॥५॥

४.६

* ८.८८.५ * हि * * * अन्तेभ्यस् * प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस् परि ।
...अनु स्वधां * न त्वा विव्याच रज इन्द्र पार्थिवम् अति विश्वं ववक्षिथ ॥ १ ॥

६ नकिः परिष्टिर् मघवन् मघस्य ते यद् दाशुषे दशस्यसि ।
अस्माकं बोध्य् उचथस्य चोदिता मंहिष्ठो वाजसातये ॥ २ ॥

८.६०.१३ शिशानो वृषभो यथाग्निः शुक्रे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥ ३ ॥

१४ नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद् वितिष्ठसे ।
स त्वं नो होतः सुहुतं हविष् कृधि वंस्वा नो वार्या
पुरु ॥ ४ ॥

८.१०२.१३ उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः ।
वायोर् अनीके अस्थिरन् ॥ ५ ॥

१४ यस्य त्रिधात्व् अवृतं बर्हिस् तस्याव् असंदिनम् ।
आपश् चिन् नि दधा पदम् ॥ ६ ॥

१५ पदं देवस्य मीदुषो ऽनाधृष्टाभिर् ऊतिभिः ।
भद्रा सूर्य इवोपदृक् ॥ ७ ॥

६.१६.२८ * * * यासद् ... अग्निस् तिग्मेन शोचिषा यंसद् विश्वं न्य् अत्रिणम् ।
* * वनते * अग्निर् नो वंसते रयिम् ॥ ८ ॥

२९ सुवीरं रयिम् आ भर जातवेदो विचर्षणे ।
जहि रक्षांसि सुक्रतो ॥ ९ ॥

३० त्वं नः पाह्य् अंहसो जातवेदो अघायतः ।
रक्षा णो ब्रह्मणस् कवे ॥ १० ॥ ॥६॥

४.७

* ९.५३.१ उत् ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।
नुदस्व याः परिस्पृधः ॥ १ ॥

२ अया निजघ्निर् ओजसा रथसङ्गे धने हिते ।
स्तवा अबिभ्युषा हृदा ॥ २ ॥

३ ...दूढ्या (एवं कौ) अस्य व्रतानि नाधृषे पवमानस्य पूर्व्या ।
रुज यस् त्वा पृतन्यति ॥ ३ ॥

४ तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् ।
...मत्सरम् (एवं कौ) इन्दुम् इन्द्राय मत्सरः ॥ ४ ॥

९.५७.१ प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
अच्छा वाजं सहस्रिणम् ॥ ५ ॥

२ अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
हरिस् तुञ्जान आयुधा ॥ ६ ॥

३ ...सुव्रतः (एवं कौ) स मर्मृजान आयुभिर् इभो राजेव सुव्रतम् ।
श्येनो न वंसु षीदति ॥ ७ ॥

४ * * * * वसूतो (एवं कौ) * * स नो विश्वा दिवो वसु उत पृथिव्या अधि ।
पुनान इन्दव् आ भर ॥ ८ ॥

८.६४.१ * * * स्तोमाः... उत् त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
अव ब्रह्मद्विषो जहि ॥ ९ ॥

२ कौ * पणीन् ... पदा पणीर् अराधसो नि बाधस्व महं असि ।
न हि त्वा कश् चन प्रति ॥ १० ॥ ॥७॥

४.८

ऋ ८.६४.३	त्वम् ईशिषे सुतानाम् इन्द्र त्वम् असुतानाम् ।
	त्वं राजा जनानाम् ॥ १ ॥
८.६.४	सम् अस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
	समुद्रायेव सिन्धवः ॥ २ ॥
६ कौ द्वितीयतृतीयपादयोर् विपर्यासः	वि चिद् वृत्रस्य दोधतो वज्रेण शतपर्वणा ।
	शिरो बिभेद वृष्णिना ॥ ३ ॥
५	ओजस् तद् अस्य तित्विष उभे यत् समवर्तयत् ।
	इन्द्रश् चर्मेव रोदसी ॥ ४ ॥
१.३६.१९	नि त्वाम् अग्ने मनुर् दधे ज्योतिर् जनाय शश्वते ।
	दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥५॥
२०	त्वेषासो अग्नेर् अमवन्तो अर्चयो भीमासो न प्रतीतये ।
	रक्षस्विनः सदम् इद् यातुमावतो विश्वं सम् अत्रिणं दह ॥ ६ ॥
८.९३.४	यद् अद्य कच् च वृत्रहन्न् उदगा अभि सूर्य ।
	सर्वं तद् इन्द्र ते वशे ॥ ७ ॥
५	यद् वा प्रवृद्ध सत्पते न मरा इति मन्यसे ।
	उतो तत् सत्यम् इत् तव ॥ ८ ॥
६	ये सोमासः परावति ये अर्वावति सुन्विरे ।
	सर्वांस् तं इन्द्र गच्छसि ॥ ९ ॥
१.२२.१७	इदं विष्णुर् वि चक्रमे त्रेधा नि दधे पदम् ।
...पांसुरे	समूढम् अस्य पांसुले ॥ १० ॥ ॥८॥

४.९

ऋ १.२२.१८	त्रीणि पदा वि चक्रमे विष्णुर् गोपा अदाभ्यः ।
	अतो धर्माणि धारयन् ॥ १ ॥
१९	विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
	इन्द्रस्य युज्यः सखा ॥ २ ॥
२०	तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
	दिवीव चक्षुर् आततम् ॥ ३ ॥
१.२७.१०	जराबोध तद् विविड्ढि विशेविशे यज्ञियाय ।
	स्तोमं रुद्राय दृशीकम् ॥ ४ ॥
११	स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।
* * हिन्वतु (एवं कौ)	धियेवाजाय हिन्वति ॥ ५ ॥
१२	स रेवाँ इव विश्पतिर् दैव्यः केतुः शृणोतु नः ।
	उक्थैर् अग्निर् बृहद्भानुः ॥ ६ ॥
६.४५.२२	तद् वो गाय सुते सचा पुरुहूताय सत्वने ।

शं यद् गवे न शाकिने ॥ ७ ॥
२३ न घा वसुर् नि यमते दानं वाजस्य गोमतः ।
यत् सीम् उप श्रवद् गिरः ॥ ८ ॥
२४ कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।
शचीभिर् अप नो वरत् ॥ ९ ॥
८.१२.१६ यत् सोमम् इन्द्र विष्णवि यद् वा घ त्रित आप्त्ये ।
यद् वा मरुत्सु मन्दसे सम् इन्दुभिः ॥ १० ॥ ॥९॥

४.१०

क ८.१२.१७ यद् वा शक्र परावति समुद्रे अधि मन्दसे ।
अस्माकम् इत् सुते रणा सम् इन्दुभिः ॥ १ ॥
१८ यद् वासि सुन्वतो वृधो यजमानस्य सत्पते ।
उक्थे वा यस्य रण्यसि सम् इन्दुभिः ॥ २ ॥
शौ ६.४९.१ तं आ ६.१०.१ न हि ते अग्ने तन्वै क्रूरं विवेद मर्त्यः ।
कपिर् बभस्ति तेजनं पुनर् जरायु गौर् इव ॥ ३ ॥
शौ २ त्वेष तु वेत् सं च वि चैव ऋण्वसि यद् उत्तराद्धा उपरेषु खादसि ।
शीर्णा शिरो वक्षसा वक्षो अर्धयन्न् अंशुं बिभर्षि हरितेभिर् आसभिः ॥ ४ ॥
क ८.१.७ कयथ केद् असि पुरुत्रा चिद् धि ते मनः ।
अलर्षि युध्म खजकृत् पुरंदर प्र गायत्रा अगासिषुः ॥ ५ ॥
८ प्रास्मै गायत्रम् अर्चत वावातुर् यः पुरंदरः ।
याभिः काण्वस्योप बर्हिर् आसदं यासद् वज्री भिनत् पुरः ॥ ६ ॥
९ ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस् तेभिर् नस् तूयम् आ गहि ॥ ७ ॥
८.९४.१ गौर् धयति मरुतां श्रवस्युर् माता मघोनाम् ।
युक्ता वहनी रथानाम् ॥ ८ ॥
२ यस्या देवा उपस्थे व्रता विश्वे धारयन्ते ।
सूर्यामासा दृशे कम् ॥ ९ ॥
३ तत् सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।
मरुतः सोमपीतये ॥ १० ॥ ॥१०॥

४.११

क ४.१७.८ सत्राहणं दाधृषिं तुम्रम् इन्द्रं महाम् अपारं वृषभं सुवज्रम् ।

हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ १ ॥

९ अयं वृतश् चातयते समीचीर् य आजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सनोत्य् अस्य प्रियासः सख्ये स्याम ॥ २ ॥

१० अयं शृण्वे अध जयन्न् उत घ्नन् अयम् उत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युम् इन्द्रो विश्वं दृढं भयत एजद् अस्मात् ॥ ३ ॥

८.७७.१० विश्वेत् ता विष्णुर् आ भरद् उरुक्रमस् त्वेषितः ।
शतं महिषान् क्षीरपाकम् ओदनं वराहम् इन्द्र एमुषम् ॥ ४ ॥

११ तुविक्षं ते सुकृतं सूमयं धनुः साधुर् बुन्दो हिरण्ययः ।
उभा ते बाहू रण्या सुसंस्कृत ऋदूषे चिद् ऋदूवृधा ॥ ५ ॥

८.१०३.६ यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
...वन्त्य् * मधोर् न पात्रा प्रथमान्य् अस्मै प्र स्तोमा यन्त्व् अग्नये ॥ ६ ॥

७ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥ ७ ॥

१.४४.१ अग्ने विवस्वद् उषसश् चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वम् अद्या देवं उषर्बुधः ॥ ८ ॥

२ जुष्टो हि दूतो असि हव्यवाहनो ऽग्ने रथीर् अध्वराणाम् ।
सजूर् अश्विभ्याम् उषसा सुवीर्यम् अस्मे धेहि श्रवो बृहत् ॥ ९ ॥

१.२७.४ इमम् ऊ षु त्वम् अस्माकं सनिं गायत्रं नव्यांसम् ।
अग्ने देवेषु प्र वोचः ॥ १० ॥ ॥११॥

४.१२

क १.२७.५ आ नो भज परमेष्व् आ वाजेषु मध्यमेषु ।
शिक्षा वस्वो अन्तमस्य ॥ १ ॥

६ विभक्तासि चित्रभानो सिन्धोर् ऊर्मा उपाक आ ।
सद्यो दाशुषे क्षरसि ॥ २ ॥

८.६.१० ...जग्रभ अहम् इद् धि पितुष् परि मेधाम् ऋतस्य जग्रह ।
अहं सूर्य इवाजनि ॥ ३ ॥

११ कौ * * जन्मना ... अहं प्रेन्ध मन्मना गिरः शुम्भामि कण्ववत् ।
येनेन्द्रः शुष्मम् इद् दधे ॥ ४ ॥

१२ ये त्वाम् इन्द्र न तुष्टुवुर् ऋषयो ये च तुष्टुवुः ।
ममेद् वर्धस्व सुष्टुतः ॥ ५ ॥

९.६६.१९ अग्न आयूंषि पवसे आसुवोर्जम् इषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ ६ ॥

२१ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीयम् ।
* रयिं मयि पोषम् (एवं कौ) दधत् पोषं रयिं मयि ॥ ७ ॥

२० अग्निर् ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तम् ईमहे महागयम् ॥ ८ ॥

५.२६.१ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान् वक्षि यक्षि च ॥ ९ ॥

१.१२.१० स नः पावक दीदिवो ऽग्ने देवं इहा वह ।
उप यज्ञं हविश् च नः ॥ १० ॥

९ यो अग्निं देववीतये हविष्मां आविवासति ।
तस्मै पावक मृडय ॥ ११ ॥

८.४४.२१ अग्निः शुचिव्रततमः शुचिर् विप्रः शुचिः कविः ।
शुची रोचत आहुतः ॥ १२ ॥

१७ उद् अग्ने शुचयस् तव शुक्रा भ्राजन्त ईरते ।
तव ज्योतींष्य् अर्चयः ॥ १३ ॥

२.७.४ शुचिः पावक वन्द्यो ऽग्ने बृहद् वि रोचसे ।
त्वं घृतेभिर् आहुतः ॥ १४ ॥

१.७५.३ कस् ते जामिर् जनानाम् अग्ने को दाश्वध्वरः ।
को ह कस्मिन्न् असि श्रितः ॥ १५ ॥ ॥१२॥

४.१३

* १.७५.४ त्वं जामिर् जनानाम् अग्ने मित्रो असि प्रियः ।
सखा सखिभ्य ईड्यः ॥ १ ॥

५ यजा नो मित्रावरुणा यजा देवं ऋतं बृहत् ।
अग्ने यक्षि स्वं दमम् ॥ २ ॥

३.२७.१३ ईळेन्यो नमस्यस् तिरस् तमांसि दर्शतः ।
सम् अग्निर् इध्यते वृषा ॥ ३ ॥

१४ वृषो अग्निः सम् इध्यते ऽश्वो न देववाहनः ।
तं हविष्मन्त ईळते ॥ ४ ॥

१५ वृषणं त्वा वयं वृषन् वृषणः सम् इधीमहि ।
अग्ने दीद्यतं बृहत् ॥ ५ ॥

८.४४.४ उत् ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।
अग्ने शुक्रास ईरते ॥ ६ ॥

५ उप त्वा जुह्वो मम घृताचीर् यन्तु हर्यत ।

अग्ने हव्या जुषस्व नः ॥ ७ ॥
६ मन्द्रं होतारम् ऋत्विजं चित्रभानुं विभावसुम् ।
अग्निम् ईडे स उ श्रवत् ॥ ८ ॥
१०.३.१ इनो राजन्न् अरतिः समिद्धो रौद्रो दक्षाय सुषुमं अदर्शि ।
चिकिद् वि भाति भासा बृहतासिक्नीम् एति रुशतीम्
अपाजन् ॥ ९ ॥
२ कृष्णां यद् एनीम् अभि वर्पसा भूज् जनयन् योषां बृहतः
पितुर् जाम् ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवो वसुभिर् अरतिर्
वि भाति ॥ १० ॥
३ भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्य् एति
पश्चात् ।
सुप्रकेतैर् द्युभिर् अग्निर् वितिष्ठन् रुशद्भिर् वर्णैर् अभि
रामम् अस्थात् ॥ ११ ॥ ॥१३॥

४.१४

* ८.६०.९ पाहि नो अग्न एकया पाह्य् उत द्वितीयया ।
पाहि गीर्भिस् तिसृभिर् ऊर्जां पते पाहि चतसृभिर् वसो
॥ १ ॥
१० पाहि विश्वस्माद् रक्षसो अराव्णः प्र स्म वाजेषु नो ऽव ।
त्वाम् इद् धि नेदिष्ठं देवतातय आपिं नक्षामहे बृधे ॥ २ ॥
८.८४.४ कया ते अग्ने अङ्गिर ऊर्जो नपाद् उपस्तुतिम् ।
वराय देव मन्यवे ॥ ३ ॥
५ दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
कद् उ वोच इदं नमः ॥ ४ ॥
६ अधा त्वं हि नस् करो विश्वा अस्मभ्यं सुक्षितीः ।
बाजद्रविणसो गिरः ॥ ५ ॥
८.७१.१० अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
* * * पुरूवसुं (एवं कौ) ... अच्छा यज्ञासो नमसा पुरोवसुं पुरुप्रशस्तम् ऊतये ॥ ६ ॥
११ अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूद् अमृतो मर्त्येष्व् आ होता मन्द्रतमो विशि
॥ ७ ॥
१४ अग्निम् ईडिष्वावसे गाथाभिः शीरशोचिषम् ।
...अग्निं * * अग्निं राये पुरुमीढ श्रुतं नरो ऽग्निः सुदीतये छर्दिः
॥ ८ ॥
१५ अग्निं द्वेषो योतवै नो गृणीमस्य् अग्निं शं योश् च
दातवे ।

विश्वासु विक्ष्व् अवितेव हव्यो भुवद् वस्तुर् ऋषूणाम् ॥ ९ ॥ ॥१४॥

४.१५

ऋ ३.११.५ अदाभ्यः पुरएता विशाम् अग्निर् मानुषीणाम् ।
तूर्णी रथः सदा नवः ॥ १ ॥
६ साह्वान् विश्वा अभियुजः क्रतुर् देवानाम् अमृक्तः ।
अग्निस् तुविश्रवस्तमः ॥ २ ॥
७ अभि प्रयांसि वाहसा दाश्वां अश्नोति मर्त्यः ।
क्षयं पावकशोचिषः ॥ ३ ॥
१.७९.४ अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
* धेहि... अस्मे देहि जातवेदो महि श्रवः ॥ ४ ॥
५ स इधानो वसुष् कविर् अग्निर् ईड्येन्यो गिरा ।
रेवद् अस्मभ्यं पुर्वणीक दीदिहि ॥ ५ ॥
६ क्षपो राजन्न् उत त्मनाग्ने वस्तोर् उतोषसः ।
स तिग्मजम्भ रक्षसो दह प्रति ॥ ६ ॥
८.७४.१ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥
२ यं जनासो हविष्मन्तो मित्रं न सर्पिर् आसुतिम् ।
प्रशंसन्ति प्रशस्तिभिः ॥ ८ ॥
३ पन्यांसं जातवेदसं यो देवतात्य् उद्यता ।
हव्यान्य् ऐरयद् दिवि ॥ ९ ॥
६.१५.७ समिद्धम् अग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारम् अद्रुहं कविं सुम्नैर् ईमहे जातवेदसम् ॥ १० ॥ ॥१५॥

४.१६

ऋ ६.१५.८ त्वां दूतम् अग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुम् ईड्यम् ।
देवासश् च मर्तासश् च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ १ ॥
९ विभूषन्न् अग्न उभयं अनु व्रता दूतो देवानां रजसी सम् ईयसे ।
यत् ते धीतिं सुमतिम् आवृणीमहे ऽध स्मा नस् त्रिवरूथः शिवो भवा ॥ २ ॥
* * भव (एवं कौ) आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
८.१०१.९

अन्तः पवित्र उपरि श्रीणानो ऽयं शुक्रो अयामि ते ॥ ३ ॥
१० वेत्य् अध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥ ४ ॥
८.२.४ इन्द्र इत् सोमपा एक इन्द्रः सुतपा विश्वायुः ।
अन्तर् देवान् मर्त्यांश् च ॥ ५ ॥
५ न यं शुक्रो न दुराशीर् न तृप्रा उरुव्यचसम् ।
अपस्पृण्वते सुहार्दम् ॥ ६ ॥
६ गोभिर् यद् ईम् अन्ये अस्मन् मृगं न व्रा मृगयन्ते ।
अभित्सरन्ति धेनुभिः ॥ ७ ॥
७ त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य ।
स्वे क्षये सुतपाव्नः ॥ ८ ॥
८ त्रयः कोशासः इचोतन्ति तिस्रश् चम्वः सुपूर्णाः ।
समाने अधि भार्मन् ॥ ९ ॥
९ शुचिर् असि पुरुनिःष्ठाः क्षीरैर् मध्यत आशीर्तः ।
दध्ना मन्दिष्ठः शूरस्य ॥ १० ॥ ॥१६॥

४.१७

ऋ ९.९८.१० इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
* * * देवाय * नरे च दक्षिणावते वीराय सदनासदे ॥ १ ॥
९ स वां यज्ञेषु मानवी इन्दुर् जनिष्ट रोदसी ।
देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥ २ ॥
१२ * * पुरोरुचं... । कौ ... वयं यूयं [* * तं सखायः पुरूरुचं यूयं वयं च सूरयः ।
अश्याम वाजगन्ध्यं सनम वाजपस्त्यम् ॥ ३ ॥
८.४५.१ आ घा ये अग्निम् इन्धते स्तृणन्ति बर्हिर् आनुषक् ।
येषाम् इन्द्रो युवा सखा ॥ ४ ॥
२ बृहन्न् इद् इध्म एषां भूरि शस्तं पृथुः स्वरुः ।
येषाम् इन्द्रो युवा सखा ॥ ५ ॥
३ अयुद्ध इद् युधा वृतं शूर आजति सत्वभिः ।
येषाम् इन्द्रो युवा सखा ॥ ६ ॥
८.२४.१९ एतो न्व् इन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
कृष्टीर् यो विश्वा अभ्य् अस्त्य् एक इत् ॥ ७ ॥
२० अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।
घृतात् स्वादीयो मधुनश् च वोचत ॥ ८ ॥
२१ यस्यामितानि वीर्या न राधः पर्येतवे ।
ज्योतिर् न विश्वम् अभ्य् अस्ति दक्षिणा ॥ ९ ॥
कौ * * * * सरूप... सुमन्मा वस्वी रन्ती सूनरी सुरूप वृषन्न् आ गहि ।

इमौ मन्त्रावृग्वेदे न स्तः

इमौ भद्रौ धुर्याव् अभि ताव् इमा उप सर्पतः ॥ १० ॥
नीव शीर्षाणि मृद्वं मध्य आपस्य तिष्ठति ।
शृङ्गेभिर् दशभिर् दिशन् ॥ ११ ॥ ॥१७॥

४.१८

ऋ ५.२६.४ अग्ने विश्वेभिर् आ गहि देवेभिर् हव्यदातये ।
होतारं त्वा वृणीमहे ॥ १ ॥
५ यजमानाय सुन्वत आग्ने सुवीर्यं वह ।
देवैर् आ सत्सि बर्हिषि ॥ २ ॥
६ समिधानः सहस्रजिद् अग्ने धर्माणि पुष्यसि ।
देवानां दूत उक्थ्यः ॥ ३ ॥
५.७१.२ विश्वस्य हि प्रचेतसा वरुण मित्र राजथः ।
ईशाना पिप्यतं धियः ॥ ४ ॥
१ आ नो गन्तं रिशादसा वरुण मित्र बर्हणा ।
उपेमं चारुम अध्वरम् ॥ ५ ॥
३ उप नः सुतम् आ गतं वरुण मित्र दाशुषः ।
अस्य सोमस्य पीतये ॥ ६ ॥
८.५३.३ आ नो विश्वेषां रसं मध्वः सिञ्चन्त्व् अद्रयः ।
ये परावति सुन्विरे जनेष्व् आ ये अर्वावतीन्दवः ॥ ७ ॥
४ विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्व् आ वसु ।
शीष्टेषु चित् ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ८ ॥
८.९०.१ * * * हव्य इन्द्रः * भूषतु * * * वृत्रहा * ऋचीषमः (कौ ऋचीषम) आ नो विश्वासु हव्यम् इन्द्रं समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषमा ॥ ९ ॥
२ त्वं दाता प्रथमो राधसाम् अस्य् असि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥ १० ॥ ॥१८॥

४.१९

ऋ ८.५१.९ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश् चिद् अर्ये रुशमे पवीरवि तुभ्येत् सो अज्यते रयिः ॥ १ ॥
१० तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कम् आनृचुः ।
... सुवानास * अस्मे रयिः पप्रथे वृष्ण्यं शवो ऽस्मे खानास इन्दवः ॥ २ ॥
१.३६.५ मन्द्रो होता गृहपतिर् अग्ने दूतो विशाम् असि ।

त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥ ३ ॥

६ त्वे इद् अग्ने सुभगे यविष्ठ्य विश्वम् आ हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान् सुवीर्या ॥ ४ ॥

४.८.१ दूतं वो विश्ववेदसं हव्यवाहम् अमर्त्यम् ।
यजिष्ठम् ऋञ्जसे गिरा ॥ ५ ॥

२ स हि वेदा वसुधितिं महं आरोधनं दिवः ।
स देवं एह वक्षति ॥ ६ ॥

३ स वेद देव आनमं देवं ऋतायते दमे ।
दाति प्रियाणि चिद् वसु ॥ ७ ॥

९.८९.२ राजा सिन्धूनाम् अवसिष्ट वास ऋतस्य नावम् आरुहद् रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर् जाम् ॥ ८ ॥

३ सिंहं नसन्त मध्वो अयासं हरिम् अरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्य् उक्षा ॥ ९ ॥

४ मधुपृष्ठं घोरम् अयासम् अश्वं रथे युञ्जन्त्य् उरुचक्र ऋष्वम् ।
स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनम् ऊर्जयन्ति ॥ १० ॥ ॥१९॥

४.२०

* ८.४.७ मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत् ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ १ ॥

८ सख्याम् अनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
...पिब (एवं कौ) मध्वा संपृक्ताः सारघेण धेनवस् तूयम् एहि द्रवा पिबा ॥ २ ॥

८.३३.१० सत्यम् इत्था वृषेद् असि वृषजूतिर् नो ऽवृतः ।
वृषा ह्य् उग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ ३ ॥

११ वृषणस् ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन् वृषणा हरी वृषा त्वं शतक्रतो ॥ ४ ॥

१२ वृषा सोता सुनोतु ते वृषन्न् ऋजीषिन्न् आ भर ।
वृषा दधन्वे वृषणं नदीष्व् आ तुभ्यं स्थातर् हरीणाम् ॥ ५ ॥

८.३.३ * * * पुरूवसो (एवं कौ)... इमा उ त्वा पुरोवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितो ऽभि स्तोमैर् अनूषत ॥ ६ ॥

४ अयं सहस्रम् ऋषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ७ ॥

९.८६.४३ ...मधुनाभ्यू अञ्जते व्यू अञ्जते सम् अञ्जते क्रतुं रिहन्ति मध्वाभ्य् अञ्जते ।
सिन्धोर् उच्छ्वासे पतयन्तम् उक्षणं हिरण्यपावाः पशुम्
आसु * अप्सु गृभ्णते ॥ ८ ॥
४५ अग्रेगो राजाप्यस् तविष्यते विमानो अह्नां भुवनेष्व् अर्पितः ।
हरिर् घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥ ९ ॥
४४ विपश्चिते पवमानाय गायत मही न धारात्य् अन्धो अर्षति ।
अहिर् न जूर्णाम् अति सर्पति त्वचम् अत्यो न क्रीडन्न् असरद् वृषा हरिः ॥ १० ॥ ॥२०॥

४.२१

* ७.१६.११ ...विवष्ट्य् * देवो वो द्रविणोदाः पूर्णां विवष्ट्व् आसिचम् ।
उद् वा सिञ्चध्वम् उप वा पृणध्वम् आद् इद् वो देव ओहते ॥ १ ॥

१२ तं होतारम् अध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यम् अग्निर् जनाय दाशुषे ॥ २ ॥

८.१०३.१ अदर्शि गातुवित्तमो यस्मिन् व्रतान्य् आदधुः ।
...नक्षन्त * * उपो षु जातम् आर्यस्य वर्धनम् अग्निं नक्षन्तु नो गिरः ॥ ३ ॥

३ यस्माद् रेजन्त कृष्टयश् चर्कृत्यानि कृण्वतः ।
...सपर्यत सहस्रसां मेधसाताव् इव त्मनाग्निं धीभिर् नमस्यत ॥ ४ ॥

२ * * * * अच्छा * * प्र देवोदासो अग्निर् देवं इन्द्रो न मज्मना ।
...सानवि अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ ५ ॥

९.१७.८ मधोर् धाराम् अनु क्षर तीव्रः सधस्थम् आसदः ।
चारुर् ऋताय पीतये ॥ ६ ॥

१ प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः ।
सोमा असृग्रम् आशवः ॥ ७ ॥

२ * सुवानास... अभि स्वानास इन्दवो वृष्टयः पृथिवीम् इव ।

* * अक्षरन् (एवं कौ)	इन्द्रं सोमासो अस्वरन् ॥ ८ ॥
८.२.१०	इमे त इन्द्र सोमास् तीव्रा अस्मे सुतासः ।
	शुक्रा आशिरं याचन्ते ॥ ९ ॥
११	तं आशिरं पुरोडाशम् इन्द्रेमं सोमं श्रीणीहि ।
	रेवन्तं हि त्वा शृणोमि ॥ १० ॥ ॥२१॥

४.२२

ऋ ८.२.१२	हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् ।
	ऊधर् न नग्ना जरन्ते ॥ १ ॥
९.६६.२४	पवमान ऋतं बृहच् छुक्रं ज्योतिर् अजीजनत् ।
	कृष्णा तमांसि जङ्घनत् ॥ २ ॥
२६	पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
	हरिश्चन्द्रो मरुद्गणः ॥ ३ ॥
२७ * * अश्नवद् ...	पवमान व्यू अश्नुहि रश्मिभिर् वाजसातमः ।
	दधत् स्तोत्रे सुवीर्यम् ॥ ४ ॥
८.१६.१	प्र सम्राजं चर्षणीनाम् इन्द्रं स्तोता नव्यं गीर्भिः ।
	नरं नृषाहं मंहिष्ठम् ॥ ५ ॥
२	यस्मिन्न् उक्थानि रण्यन्ति विश्वानि च श्रवस्या ।
	अपाम् अवो न समुद्रे ॥ ६ ॥
३	तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् ।
	महो वाजिनं सनिभ्यः ॥ ७ ॥
३.१२.५[१-३]	प्र वाम् अर्चन्त्य् उक्थिनो नीथाविदो जरितारः ।
४[३]	इन्द्राग्नी इष आ वृणे ॥ ८ ॥
६	इन्द्राग्नी नवतिं पुरो दासपत्नीर् अधूनुतम् ।
	साकम् एकेन कर्मणा ॥ ९ ॥
७	इन्द्राग्नी अपसस् पर्यु उप प्र यन्ति धीतयः ।
	ऋतस्य पथ्या अनु ॥ १० ॥ ॥२२॥

४.२३

ऋ ३.१२.४	तोशा वृत्रहणा हुवे सजित्वानापराजिता ।
	इन्द्राग्नी वाजसातमा ॥ १ ॥
८.८९.३	प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
	वृत्रं हनति वृत्रहा शतक्रतुर् वज्रेण शतपर्वणा ॥ २ ॥
४	अभि प्र भर धृषता धृषन्मनः श्रवश् चित् ते असद् बृहत् ।
	अर्षन्त्व् आपो जवसा वि मातरो हनो वृत्रं जया स्वः ॥ ३ ॥

८.३.५ इन्द्रम् इद् देवतातय इन्द्रं प्रयत्य् अध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ४ ॥

६ इन्द्रो मह्ना रोदसी पप्रथच् छव इन्द्रः सूर्यम् अरोचयत् ।
...सुवानास * इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे स्वानास इन्दवः ॥ ५ ॥

७.१००.५ * * * * * * नामार्यः * * प्र तत् ते अद्य शिपिविष्ट हव्यम् अर्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसम् अतव्यान् क्षयन्तम् अस्य रजसः पराके ॥ ६ ॥

६ कौ * * * * परिचक्षि नाम * * * * किम् इत् ते विष्णो परिचक्ष्यं भूत् प्र यद् ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मद् अप गूह एतद् यद् अन्यरूपः समिथे बभूथा ॥ ७ ॥

बभूथ (एवं कौ) वषट् ते विष्णव् आस आ कृणोमि तन् मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

४.४७.१ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ९ ॥

२ इन्द्रश् च वायव् एषां सोमानां पीतिम् अर्हथः ।
युवां हि यन्तीन्दवो निम्नम् आपो न सध्र्यक् ॥१०॥ ॥२३॥

४.२४

* ४.४७.३ वायव् इन्द्रश् च शुष्मिणा सरथं शवसस् पती ।
नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥ १ ॥

९.९९.२ अध (एवं कौ)...गाहते अधा क्षपा परिष्कृतो वाजं अभि प्र गाहसे ।
यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥ २ ॥

३ तम् अस्य मर्जयामसि मदो य इन्द्रपातमः ।
यं गाव आसभिर् दधुः पुरा नूनं च सूरयः ॥ ३ ॥

४ तं गाथया पुराण्या पुनानम् अभ्य् अनूषत ।
* कृपन्त (एवं कौ)... उतो श्रवन्त धीतयो देवानां नाम बिभ्रतीः ॥ ४ ॥

१.२७.१ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
सम्राजन्तम् अध्वराणाम् ॥ ५ ॥

२ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।
मीढ्वां अस्माकं बभूयात् ॥ ६ ॥

३ स नो दूराच् चासाच् च नि मर्त्याद् अघायोः ।
